इन्द्वग्निरुद्रनवनेत्रयुगार्कदिक्षु ।
ऋत्वष्टषोडशचतुर्दशभौतिकेषु ।

पातालपञ्चदशवह्निहिमांशुकोष्टे ।
वर्णाल्लिखेल्लिपिभवान् क्रमशस्तु धीमान् ॥ ३९ ॥
नामाद्यक्षरमारभ्य यावन्मन्त्रादिमाक्षरम् ।
चतुर्भिः कोष्टैरेकैकमिति कोष्ठचतुष्टयम् ।
पुनः कोष्ठगकोष्ठेषु सव्यतो नाम्न आदितः ॥ ४० ॥
सिद्धः साध्यः सुसिद्धोऽरिः क्रमाज्ज्ञेयो विचक्षणैः ॥ ४१ ॥
सिद्धार्णा बान्धवाः प्रोक्ताः साध्यास्तु सेवकाः स्मृताः ।
सुसिद्धाः पोषका ज्ञेयाः शत्रवो घातकाः स्मृताः ॥ ४२ ॥
सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः ।
सुसिद्धो ग्रहणादेव रिपुर्मूलं निकृन्तति ॥ ४३ ॥
सिद्धसिद्धोयथोक्तेन द्वैगुण्यात् सिद्धसाध्यकः ।
सिद्धसुसिद्धोऽर्द्धजपात् सिद्धारिर्हन्ति बान्धवान् ॥ ४४ ॥
साध्यसिद्धो द्विगुणकः साध्यसाध्यो निरर्थकः ।
तत्सुसिद्धस्तुद्विगुणात् साध्यारिर्हन्ति गोत्रजान् ॥ ४५ ॥
सुसिद्धसिद्धोऽर्द्धजपात् ततसाध्यो द्विगुणोऽधिकात् ।
तत्सुसिद्धो ग्रहादेव सुसिद्धारिः स्वगोत्रहा ॥ ४६ ॥
अरिसिद्धः सुतान् हन्यादरिसाध्यस्तु कन्यकाः ।
तत्सुसिद्धस्तु पत्नीघ्नस्तदरिर्हन्तिसाधकम् ॥ ४७ ॥
वटपत्रे लिखित्वारिमंत्रं स्रोतसि निक्षिपेत् ।
एवं मंत्रविमुक्तिः स्यादित्याह भगवान् शिवः ॥ ४८ ॥

(Akathaha-cakra)

25. On the first instance draw a square with four houses in it. Again, draw a four houses in each of these four houses. Thus drawing a sixteen housed cakra, place the A-kārādi alphabets in them in the following manner : Place A in the first house, Ā in the third,

I in the eleventh, Ī in the ninth, U in the second, Ū in the fourth, Ṛ in the twelfth, Ṝ in the tenth, Ḷ in the sixth, Ḹ in the eighth, E in the sixteenth, Ai in the fourteenth, O in the fifth, Au in the seventh, Aṁ in the fifteenth, and Aḥ in the thirteenth. Writing thus the sixteen vowels in the sixteen houses, consonants from Kakārādi to Ha should be written in the houses in the same manner.

अकथह १	उ ङ प २	आ ख द ३	ऊ च फ ४
ओडव ५	लृ क्ष म ६	औ ढ श ७	ल्रृ ञ य ८
ईघन ९	ॠ ज भ १०	इ ग ध ११	ॠ छ व १२
अः त स १३	ऐ ठ ल १४	अं ण ष १५	ए ट र १६

Preparing a cakra in the aforesaid manner one should take the first letter of the name and count from left to right up to the first letter of the Mantra, first in the four primary houses and then four houses situated within these four, assuming each one after another in the order as Siddha, Sādhya, Susiddha, and Ari (enemy).

The Siddha mantras are called Bāndhava (brotherly), Sadhya Mantras Sevaka (Servants), Susiddha Mantras Poṣaka (Supporter) and Ari Mantra Ghātaka (Fatal). When a Siddha Mantra is adopted it becomes efficacious at proper time. When a Sādhya Mantra is adopted it becomes efficacious by Japa and Homa, etc. When a Susiddha Mantra is adopted it becomes efficacious

immediately. And when an Ari Mantra is adopted the Sādhaka meets his total destruction. Siddha-Siddha Mantra becomes fruitful after a short time; Siddha-Sādhya Mantra becomes fruitful by doing double the number and the Siddha-Susiddha Mantra by doing half the number of Japas of the first category. By the Japa of a Siddha-Ari Mantra the kinsmen are destroyed. Sādhya-Siddha Mantra becomes fruitful by doing double the number of Japas. The Japa of a Sādhya-Sādhya Mantra is fruitful by doing double the number of Japa. By the Japa of Sādhya-Ari Mantra kinsfolk are destroyed; Susiddha-Siddha Mantra becomes fruitful by half the number, and Susiddha-Sādhya Mantra by more than double the number of Japas. A Susiddha-Susiddha Mantra destroys one's own species. Japa of an Ari-Siddha Mantra destroys the sons. Japa of an Ari-Sādhya Mantra destroys the daughters. Japa of Ari-Susiddha Mantra destroys the wife. Japa of Ari-Ari Mantra destroys the Sādhaka himself. Therefore in no case is it proper to adopt an Ari Mantra. If by mistake one happens to adopt it, he should write it on a Baṭa- (Ficus Indica) leaf and then throw that leaf in some river or stream. An Ari Mantra is discarded in this manner, which is the procedure described by Lord Śiva Himself.

(अकडमचक्रम्)

२६. रेखाद्वयं पूर्वपरेण कुर्यात्तन्मध्यतो याम्य कुबेरभेदात् ।
महेशरक्षोऽधिपतिक्रमेण तिर्यक्कथा वायुहुताशनेन ॥ ४९ ॥
अकारादिक्षकारान्तान् क्लीवहीनान् लिखित्ततः ।
एकैकक्रमतो लेख्यान् मेषादिसु वृषान्तकान् ॥ ५० ॥

गणयेत् क्रमशो भद्रे नामादिवर्णपूर्वकान् ।
मेषादितश्च मीनान्तं गणयेत् क्रमशः सुधीः ॥ ५१ ॥
जप्तुः स्वनामतो मंत्री यावन्मंत्रादिमाक्षरम् ॥ ५२ ॥
सिद्धसाध्यसुसिद्धारीन् पुनः सिद्धादयः पुनः ।
नवैकपञ्चमे सिद्धः साध्यः षड्दशयुग्मके ॥ ५३ ॥
सुसिद्धः त्र्यर्षिरुद्रे च वेदाष्टद्वादशे रिपुः ।
एतत्ते कथितं देवि अकडमादिकमुत्तमम् ॥ ५४ ॥

(Akaḍama-Cakra)

26. Drawing two parallel lines from east to west two more parallel lines be drawn across these from north to south. Thereafter drawing four lines at the four mid-corners (known as Īśāna, etc.) a Rāśi-cakra should be completed. Beginning from the midpoint one should place the twelve Rāśis, from Meṣa to Vṛṣa one each in each of the twelve houses, and then starting again from the same midpoint (House of Meṣa) one should place the letters from A-kāra to Kṣa-kāra in the order of one letter in each house by rotation. Only the four neuter letters Ṛ, Ṝ, Ḷ, Ḹ should be left out.

Now, the Meṣa house would receive the four letters A, Ka, Ḍa, Ma. For the extrication of a Mantra one should follow the procedure of counting from Meṣa to Mīna respectively Siddha, Sādhhya, Susiddha and Ari Mantras. These are counted by beginning from the house containing the first letter of the name of a Sādhaka to the house of the first letter of the Mantra. Mantras situated in the ninth, first and fifth houses should be regarded as Siddha; in the sixth, tenth and second as Sādhya; in the third, seventh and eleventh

as Susiddha, and in the fourth, eighth and twelfth as Ari. O Devi ! Lord Śiva ordains that this is Akaḍama Cakra.

AKAḌAMA CAKRA

मीन अः ठ भ / कुम्भ अं ट व	मेष अ क ड म	वृष आ ख ढ य / मिथुन इ ग ण र
कर्क औ ञ फ क्ष	अकडम चक्रम्	मकर ई घ त ल
धनु ओ ङ्ग प ह / वृश्चिक ऐ ज न स	तुला ए छ ध ष	सिंह उ ङ थ व / कन्या ऊ च द श

(ऋणिधनिचक्रम्)

२७. कोष्ठा एकादशोन्नेयाः वेदेन परिपूरिताः ।
अकारादिहकारांताँल्लिखेत् कोष्ठेषु तत्त्ववित् ॥ ५५ ॥
प्रथमं पञ्चकोष्ठेषु ह्रस्वदीर्घक्रमेण तु ।
द्वयं द्वयं लिखेत्तत्र विचारेण तु साधकः ॥ ५६ ॥
शेषेष्वेकैकशो वर्णान् क्रमशस्तु लिखेत् सुधीः ॥

अपिच

द्वौ द्वौ स्वरौ पञ्चसु कोष्ठकेषु
शेषान् स्वरान् षट्सु षडेकमेकम् ।
कादीन् हशेषान् विलिखेत्ततोऽर्णान्
एकैकमेकादशसु त्रिकेषु ॥ ५८ ॥

षट्-काल-काल-वियदग्नि-समुद्र-वेद-
खकाश-शून्य-दहनाः खलु साध्य-वर्णाः ।
युग्म-द्विपश्च-वियदम्बरयुक्शशांक-
व्योमाब्धि वेद-शशिनः खलु साधकार्णाः ॥ ५९ ॥

(साधकाङ्काः)

नामाज्झलादकठवाद्गजभक्तशेषम् ।
ज्ञात्वोभयोरधिकशेषमृणं धनं स्यात् ॥ ६० ॥

मन्त्रो यद्यधिकाङ्कः स्यात्तदा मन्त्रं जपेत् सुधीः ।
समेऽपि च जपेन्मन्त्रं न जपेत्तु ऋणाधिकं ॥ ६१ ॥

शून्ये मृत्युं विजानीयात्तस्माच्छून्यं परित्यजेत् ॥ ६२ ॥

सुप्तोजागर्त्ति येनासौ दूरस्थः प्रतिभाषते ।
वदत्यन्यमनस्कोऽपि तन्नाम ग्राह्यमेव च ॥ ६३ ॥

(Ṛṇi-Dhani-Cakra)

27. First of all drawing eleven houses and completing them with four houses in each, one should prepare a Cakra. In the first five houses of this cakra the ten vowels are placed at the rate of one short and one long vowel in each house in A-kārādi order. Thereafter, starting with S-kārādi vowels and consonants from Ka to Ha one letter each is placed in each house in the usual order. Above these four rows are written the Sādhya numbers 6,6,6,0,3,4,4,0,0,0, and 3, one in each house; and at the bottom the Sādhaka numbers 2,2,5,0, 0,2,1,0,4,4, and 1, one in each house.

Rni-Dhani Cakra

६	६	६	०	३	४	४	०	०	०	३
अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ	ए	ऐ	ओ	औ	अं	अः
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट
ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ
ब	भ	म	य	र	ल	व	श	ष	स	ह
२	२	५	०	०	२	१	०	४	४	१

Now one should place all the vowels and consonants of the Mantra in a separated order and then all the letters which occur should be located in this Cakra. Then the numbers at the top of each house in which the letters are located, should be picked up and added together, their total divided by eight and remainder noted. In the same manner all the vowels and consonants of the name of the recipient of a Mantra are placed in separate order. After locating each of these letters in the cakra one should note this time the number at the bottom of each of the houses in which the letters have been located. Now adding them together, divide the total by eight to find out the remainder. Thereafter, the formerly noted remainder and this second remainder number, both are the object of consideration. The number which is greater is called Ṛṇi and the number which is lesser is called Dhani. If the Mantra is Ṛṇi, that is if the remainder number of the Mantra is greater, then that Mantra is worth adopting. And if the Mantra is Dhani, that is its number

is lesser, then such a Mantra should not be adopted. In case of Mantra and Name numbers being equal, then too the Mantra can be adopted. But if both the numbers are zero then by adopting such a Mantra one meets his death. Therefore such a Mantra should be rejected. The name, calling with which a sleeping person awakens, hearing from a distance the name to which he replies inspite of concentration in some work, the name on which he speaks, is the name which should be taken for consideration and counting on this Ṛṇi-Dhani cakra. (The word "Akathavada" in the text indicates the first letter of each of the rows of the houses of the cakra).

अथ उपास्यनिर्णयविधिः

२८. निराकारात्समुत्पन्नं साकारं सकलं जगत् ।
तत्साकारं समाश्रित्य ध्याने भवति तन्मयम् ॥ १ ॥
तत्त्वाद्ब्रह्माण्डमुत्पन्नं तत्त्वेन परिवर्त्तते ।
तत्त्वेन लीयते देवि तत्त्वाद्ब्रह्माण्डनिर्णयः ॥ २ ॥
शिवः सूर्यो गणेशश्च विष्णुः शक्तिर्यथाक्रमम् ।
सगुणोपासनायाश्च देवताः पञ्चकीर्त्तिताः ॥ ३ ॥
उपासनानां पञ्चानां पञ्चतत्त्वविवेकतः ।
निर्णयो मुनिभिः पूर्वं कृतः सूक्ष्मार्थदर्शिभिः ॥ ४ ॥
वेदप्रमाणतश्चैव तथायुक्तिविचारतः ।
सिद्धः स सर्वथादेवि सर्वकल्याणकारकः ॥ ५ ॥
विरोधो दृश्यते योऽसौ सम्प्रदायवतामिह ।
अज्ञानजोऽयं हेतुर्वै दुर्गतेनात्र संशय ॥ ६ ॥

PROCEDURE FOR THE DETERMINATION OF THE UPĀSYA

28. This entire formal world emanates from the Formless. Therefore, by concentration on shape a man becomes concentrated and absorbed. The entire universe originates from the Tattva (fundamental reality, the essence); the change and dissolution of the entire Universe is also determined by the Tattva. The worshipped Deity (Upāsya Devatā) of Saguṇa worship (Attributive worship or worship of a Deity in his form) are determined in order to be Śiva, Sūrya, Gaṇeśa, Viṣṇu, and Śakti. On the basis of the five elements, the keen-sighted great sages have described five kinds of worship. This worship-differentiation becomes all-beneficial through the consideration of Veda and expediency. The mutual opposition between sectarial Ācāryas which is seen these days doubtessly originating from ignorance, is the cause of distress.

(पञ्चदेवविज्ञानम्)

९. प्रकृतेः पर एवाऽन्यः स नरः पञ्चविंशकः ।
तस्येमानि च भूतानि तेन नारायणः स्मृतः ॥ ७ ॥
सविता सर्वभूतानां सर्वान् भावान् प्रसूयते ।
सवनात् पावनाच्चैव सविता तेन चोच्यते ॥ ८ ॥
ब्रह्माण्डमूलभूता या पूजिता देवतागणैः ।
ईशनात्सर्वलोकस्य मता सा वै महेश्वरी ॥ ९ ॥
गुणत्रयेश्वरोऽतीततत्त्वो व्यक्तः सुनिर्मलः ।
गणानामीश्वरो यस्मात् तस्माद् गणपतिर्मतः ॥ १० ॥

ब्रह्मादीनां सुराणां च मुनीनां ब्रह्मवादिनाम् ।
तेषां महत्वाद्देवोऽयं महादेवः प्रकीर्त्तितः ॥-११ ॥
देवपञ्चकमित्याहुरेकं देवं सुधीवराः ।
एकमेव परं ब्रह्म परमात्मपराभिधम् ॥ १२ ॥

SCIENCE OF THE FIVE DEITIES

29. The Puruṣa, who is beyond the Prakṛti and is the twentyfifth Tattva and who is the lord of this moveable and immoveable world, is called Nārāyaṇa. One who creates all the beings and objects, and purifies the world, is for this reason called Savitā (Sūrya or the sun). One who is the root-form of this Universe, who is worshipped by the Deities, who is the Īśvara of the world is for this reason called Maheśvara. One who is the Lord of the three Qualties, is beyond the Tattvas, is unmanifest and extremely free of impurites, and is the Lord of the Gaṇas, is called Gaṇapati (Gaṇeśa). One who is great among Brahmā and other Deities, Ascetics, Brahmavādins that God is called Mahādeva (Śiva). In this manner the venerable great sages have differentiated one and the same Parabrhaman Paramātmā into five kinds of Deities.

(अधिकारनिर्णयः)

३०. मनवानां प्रकृतयः पञ्चधा परिकीर्त्तिताः ।
यतो निरूप्यते सर्गः पञ्चभूतात्मको बुधैः ॥ १३ ॥
भिन्ना यद्यपि भूतानां प्रकृतिः प्रकृतेर्वशात् ।
तथापि पञ्चतत्त्वानामनुसारेण तन्त्रवित् ॥ १४ ॥
प्रत्येकतत्त्वप्राचुर्यं विमृश्य विधिपूर्वकम् ।
उपासनाधिकारस्य पञ्चभेदवर्णयत् ।

उपासनाः पञ्चविधा इत्थं निर्णयते स्फुटम् ॥ १५ ॥
आकाशस्याधिपो विष्णुरग्नेश्चापि महेश्वरी ।
वायोः सूर्यः क्षितेरीषो जीवनस्य गणाधिपः ॥ १६ ॥
गुरवो योगनिष्णाताः प्रकृतिं तच्चधागताम् ।
परीक्ष्य कुर्य्युः शिष्याणामधिकारविनिर्णयम् ॥ १७ ॥
ऋतम्भरधिया ज्योतिः स्वरोदयसहायतः ।
उपासनाधिकारो वै निर्णेतु शक्यते ध्रुवम् ॥ १८ ॥
चित्तसंवेगवैराग्यधारणादिविनिर्णयम् ।
परीक्ष्य चास्यान्तरिकान् भावाँच्छिष्यस्य योगवित् ॥१९॥
तत्सम्प्रदायनियमं तेषां प्रकृतिसन्निभम् ।
करोति जीवकल्याणकल्पनाकलितान्तरः ॥ २० ॥

(Determination of the Right of Worship)

30. The creation is five–elemental and therefore the nature of man is also of five kinds. Although, due to the natural diversity there is always some difference in the natures of men, yet according to the Ākāśādi five Elements great sages adept in Tantra have divided men's right to worship into five kinds in accordance with the predominance of any one of the Ākāśādi five elements. In the worship of the five, the right to worship the five Deities is determined in this manner : The Lord of Ākāśa is Viṣṇu; Lord of Agni is Maheśvra; of Vāyu is Sūrya; of Pṛthivī is Śiva, and of Jala is Gaṇeśa. The Guru adept in Yoga should decide the right of worship of the Śiṣya on the basis of his (Śiṣya's) five–fold nature. Truth containing wisdom, Svarodaya (s. v) and Astrology are the three bases with the help of which a right of worship can be

decided. After the determination of the right of worship in accordance with the worship of Five, when on the basis of tests of internal feelings and also on the basis of his emotions, aversion from worldly desires, and concentration, the sect and form is decided in consonance with his disposition then the welfare of the Śiṣya is assured.

अथ मन्त्रयोगाङ्गवर्णनम्

३१. भवन्ति मन्त्रयोगस्य षोडषाङ्गानि निश्चितम् ।
यथा सुधांशोर्जायन्ते कलाः षोडश शोभनाः ॥ १ ॥
भक्तिः शुद्धिश्चाऽऽसनं च पञ्चाङ्गस्याऽपि सेवनम् ।
आचारधारणे दिव्यदेशसेवनमित्यपि ॥ २ ॥
प्राणक्रिया तथा मुद्रातर्पण हवणं बलिः ।
योगो जपस्तथा ध्यानं समाधिश्चेति षोडश ॥ ३ ॥
भक्तेर्भेदास्त्रयो ज्ञेयाश्चाऽधिकारस्य भेदतः ॥
त्रैगुण्यभेदात्त्रिविधोऽधिकारोऽस्याः प्रकीर्त्तितः ॥ ४ ॥
शुद्धिश्चतुर्विधा प्रोक्ता चाऽऽसनं द्विविधं स्मृतम् ।
पंञ्चाङ्गसेवनं गीतास्तोत्रपाठादिकं मतम् ॥ ५ ॥
आचारस्त्रिविधः प्रोक्तोऽधिकारास्तस्य सप्तवै ।
धारणा द्विविधा प्रोक्ता बाह्याभ्यन्तर भेदतः ॥ ६ ॥
षोऽशाङ्गं विनिर्दिष्टं दिव्यदेशस्य सेवनम् ।
आविर्भवन्तीष्टदेवा अत्रैवाशु स्वभावतः ॥ ७ ॥
यदङ्गभूता न्यासाद्याः सैका प्राणक्रिया मता ।
भावबाहुल्यवत्त्वाद्धि बह्व्यो मुद्राः प्रकर्त्तिताः ॥ ८ ॥
देवानां प्रीतिकृज्ज्ञेयं तर्पणं हवनं बलिः ।
बाह्याभ्यन्तरभेदेन यज्ञभेदो द्विधा मतः ॥ ९ ॥

श्रद्धोपचारभेदेन पूजाया भेदकल्पना ।
जपस्य हि त्रयोभेदा ध्यानं बहुविधं मतम् ॥
परं समाधिरेकः स्यान्महाभावेतिनामकः ॥ १० ॥

DESCRIPTION OF THE CONSTITUENT PARTS OF MANTRA YOGA

31. Just as the Moon is embelished with sixteen Kalās, so is the Mantra Yoga also embelished with sixteen constituent parts (Aṅgas). Bhakti, Śuddhi, Āsana, Pañcāṅgasevana, Ācāra, Dhāraṇā, Divyadeśa-sevana, Prāṇa-kriyā, Mudrā, Tarpaṇa, Havana, Bali, Yāga, Japa, Dhyāna, and Samādhi are the sixteen organs or parts of Mantra Yoga.

Bhakti has three divisions and with the difference of right and suitability of Upāsanā the rights of Bhakti are also three in accordance with Triguṇas. Śuddhi has four kinds and Āsana has two. On the basis of Gītā, Stotra, etc., which are five, is the ritual of Pañcāṅga-sevana so named. Inspite of three kinds of Ācāra the rights of Sādhakas are assumed to be seven. On the basis of Internal and External, the Dhāraṇā is also of two kinds. Divyadeśa-sevana has sixteen kinds in which quite naturally the manifestation of Deities takes place. Prāṇa-kriyā is one, but Nyāsa etc., are its parts. Being multi-expressional, the kinds of Mudrās are numerous. Tarpaṇa, Havana, and Bali are loved by Deities. On the basis of external and internal, the Yajña is of two kinds. The Pūjā is conceived in accordance with the difference in reverence, and the kinds of Pūjā are differentiated in accordance with faithfulness. Japa is threefold. Although, in

accordance with the difference of Upāsanā, Dhyāna being manifold (in accordance with the worship of Five Deities) yet Samādhi is of only one kind. This Samādhi of Mantra Yoga is called Mahābhāva.

अथ भक्तिवर्णम्

३२. भक्तिस्तु त्रिविधा ज्ञेया वैधी रागात्मिका परा ।
देवे परोऽनुरागस्तु भक्तिः सम्प्रोच्यते बुधैः ॥ १ ॥
विधिना या विनिर्णीता निषेधेन तथा पुनः ।
साध्यमाना च या धीरैः सा वैधी भक्तिरुच्यते ॥ २ ॥
ययाऽऽस्वाद्य रसान्भक्तेर्भावे मज्जति साधकः ।
रागात्मिका सा कथिता भक्तियोगविशारदैः ॥ ३ ॥
पराऽऽनन्दप्रदा भक्तिः परा भक्तिर्मता बुधैः ।
या प्राप्यते समाधिस्थैर्योगिभिर्योगपारगैः ॥ ४ ॥
त्रैगुण्यभेदात्त्रिविधा भक्ता वै परिकीर्त्तिताः ।
आर्त्तो जिज्ञासुरर्थार्थी तथा त्रिगुणतः परः ॥
पराभक्त्यधिकारी यो ज्ञानिभक्तः स तुर्यकः ॥ ५ ॥
उपासकाः स्युस्त्रिविधास्त्रिगुणस्याऽनुसारतः ।
ब्रह्मोपासक एवाऽत्र श्रेष्ठः प्रोक्तो मनीषिभिः ॥ ६ ॥
सगुणोपासना या स्यादवतारप्रपूजनम् ।
विहिता ब्रह्मबुद्ध्या चेदत्रैवान्तर्भवन्ति ताः ॥ ७ ॥
सकाम बुद्धया विहितं देवर्षिपितृपूजनम् ।
द्वितीयश्रेणिका ज्ञेयास्तत्कर्त्तारस्तथा पुनः ॥ ८ ॥
तृतीय श्रेणिकास्ते स्युः क्षुद्रशक्तिसमर्चकाः ।
प्रेताद्युपासनं चैव निम्नश्रेणिकमुच्यते ॥ ९ ॥
ब्रह्मोपासनमेवाऽत्र मुख्यं परममङ्गलम् ।
निःश्रेयसकरं ज्ञेयं सर्वश्रेष्ठं शुभावहम् ॥ १० ॥

DESCRIPTION OF BHAKTI

32. There are three kinds of Bhakti, viz. Vaidhi bhakti; Rāgātmikā-bhakti and Parā-bhakti. Exclusive attachment towards ones worshipped Deity is called Bhakti by persons of composed mind. Determined by procedural restrictions and feasibility is the Bhákti called Vaidhī. Infúsing sense of devotion the Bhakti which absorbs a Sādhaka in a particular attachment is called Rāgātmikā. The Bhakti providing Paramānanda (Supreme Bliss) is called Parā-bhakti, which a Yogī adept in Yoga obtains in the state of Samādhi. According to the differentiation of Triguṇa, a Bhakta (Devotee) is also of three kinds, viz. Ārta, Jijñāsu and Arthārthī. There is a fourth kind also known as Jñānī, which is above the Triguṇas. Only a Jñanī devotee is entitled to Parā-bhakti. In accordance with the Triguṇa differentiation the worshippers are of three kinds. Brahmopāṣaka is the best of all—so has been said by the erudites. Saguṇa-worshippers through Brahmabuddhi and Avatāra-worshippers also through Brahmabuddhi come under this very category. The worshippers of Sages (Ṛṣis), Deities (Devatā), and Fathers (Pitaras) through selfish intellect are considered second raters while worshippers of petty powers are regarded as third raters. The worship of Demigods and Pretas, etc., comes under this third category. The worship of the first kind, viz., the Brahmopāsanā is most prosperous and being of Supreme good is worth knowing as the best of all.

अथ शुद्धिवर्णनम्

३३. काय-चित्त-दिशा-स्थानभेदाच्छुद्धिश्चतुर्विधा ।

चौखम्भा ओरियन्टालिया
के.३७/१०९
गोपाल
मन्दिर लेन
वाराणसी

यद्वा —

स्थानशुद्धिश्च दिक्शुद्धिर्बाह्यशुद्धिस्तथैव च ॥ १ ॥
अन्तःशुद्धिरिति प्रोक्तास्ताश्चतस्रो यथाक्रमम् ॥
स्थानशुद्धया पुण्यवृद्धिः पावित्र्यञ्च प्रजायते ॥ २ ॥
दिक्शुद्ध्याशक्त्यधिगमो बाह्यशुद्ध्यात्महृष्टता ।
इष्टदेवकृपाप्राप्तिश्चान्तःशुद्ध्येष्टदर्शनम् ॥ ३ ॥
समाधिसिद्धिर्भवति, योगी शुद्धीः समाचरेत् ॥

DESCRIPTION OF ŚUDDHI

33. On the basis of differentiation of Kāyā (body), Mana (mind), Dik (Quarters), and Sthāna (Place), Śuddhi is of four kinds. These are called in the order—Sthāna-śuddhi, Dikśuddhi, Bāhya (External, of Kāyā)-śuddhi. and Antaḥ(Mana)-śuddhi. The Sthāna-śuddhi increases piousness and virtuosness. From Dik-śuddhi one obtains Śakti (power). From Bāhya or Kāya-śuddhi one gets self-rejoicing and the kindness of Iṣṭa-Davatā (Worshipped Deity). And from Antaḥ-śuddhi one obtains the vision of his Iṣṭadevatā and Samādhi. A Yogī should always observe all these four Śuddhis.

(दिक्शुद्धिः)

३४. आसीनः प्राङ्मुखोनित्यं जपं कुर्याद्यथाविधि ।
रात्र्यावुदङ्मुखेः कुर्याद्दैवं कार्यं सदैव हि ॥ ४-५ ॥
दिक्शुद्ध्या साधकः सिद्धिं साधने लभतेऽञ्जसा ।
मनश्च वश्यतां यातीत्यतः कार्या प्रयत्नतः ॥ ६ ॥

(Dik-śuddhi)

34. Sitting with his face either towards east or north, one should perform Japa properly, and in

the night sitting with face towards north always perform rites of the Devatā. Through Dik–śuddhi a Sādhaka obtains Siddhi in his Sādhanā. Therefore a careful Yogī should always observe Dik–śuddhi.

(स्थानशुद्धिः)

३५. गोमयेन यथा स्थानं कायो गङ्गोदकेन च ।
पञ्चशाखायुतं देशं तथा सिद्धिप्रदायकम् ॥ ७ ॥
गोशाला वै गुरोर्गेहं देवायतन-काननम् ।
पुण्यक्षेत्रं नदीतीरं सदा पूतं प्रकीर्त्तितम् ॥ ८ ॥

(Sthāna–śuddhi)

35. Just as the body is purified with Ganges–water, so is it proper to purify a place with cowdung. A place under the five kinds of trees, viz. Aśvattha (Ficus Religiosa), Baṭa (Ficus Indica), Āmalakī (Emblic Myrobalan), Bilva (Aegle Marmelos), and Aśoka (Jonesia Asoka Roxb.) known as Pañcavaṭī, is the one which gives all Siddhis (Accomplishments). Gośālā (Cowpen); Guru's house, Temple, Forest, Tirtha (a Sacred place), and a Nadī-taṭa (River bank) are the places always regarded as sacred.

(कायशुद्धिः)

३६. स्थानमूलाः क्रियाः सर्वाः श्रुतिस्मृत्युदिता नृणाम् ।
तस्मात्स्नानं निषेवेत श्री-पुष्ट्यारोग्यवर्द्धनम् ॥ ९ ॥
मान्त्रं भौमं तथाऽऽग्नेयं वायव्यं दिव्यमेव च ।
वारुणं मानसञ्चैव सप्तस्नानं प्रकीर्त्तितम् ॥ १० ॥
आपोहिष्ठादिभिर्मान्त्रं भौमं देहप्रमार्जनम् ।
आग्नेयं भस्मनास्नानं वायव्यं गोरजः स्मृतम् ॥ ११ ॥

यत्तदाऽऽतपवर्षेण स्नानं दिव्यमिहोच्यते ।
वारुणं चावगाहः स्यान्मानसं विष्णुचिन्तनम् ॥ १२ ॥
अनन्तादित्यसङ्काशं वामदेवं चतुर्भुजम् ।
शङ्खचक्रगदापद्ममुकुटं शेषशायिनम् ॥ १३ ॥
प्रभूतसत्त्वसम्पन्नं ध्यायेन्नारायणं विभुम् ।
अथ स्नानं प्रकुर्वीत यथा शास्त्रविधिः स्मृतिः ।
मलप्रक्षालनं स्नानं स्वशाखोक्तं समाचरेत् ॥ १४ ॥
ताम्रपात्रं सदूर्वं च सतिलं सजलं तथा ।
गृहीत्वा स्वेष्टदेवस्य प्रीतये स्नानमाचरेत् ॥ १५ ॥
गुरुपङ्क्तिं तु सन्तर्प्य तर्पयेदिष्टदेवताम् ।
मान्त्रं स्नानं साधको वै नित्यं कुर्याद्यथाविधि ॥ १६ ॥

(Kāya-Śuddhi)

36. In the process of Sādhanā bathing is the first thing for a person—so has been laid down by the Vedas and Dharmaśāstras. A further speciality about this bathing is that it adds both to the nutrition and health of the body. Bathing is of seven kinds, viz. Mantra-snāna, Bhauma-snāna, Āgneya-snāna, Vāyavya-snāna, Divya-snāna, Vāruṇa-snāna, and Mānasa-snāna. Bathing with water along with the recitation of "Apohiṣṭhā"[1] etc., Mantras is called Mantra-snāna. Rubbing the body well with a towel is called Bhauma-snāna. Smearing the body with Bhasma (remnants of oblation poured in a Yajña) is called Āgneya-snāna. Smearing the body or bringing it in contact with Goraja (a particle of dust on a cow-hair) is called

1. Rv. X. 9, 1; Av. I. 5, 1; Sv. II. 1187; Vaj Sam, XI. 50; Tait. Sam. IV. 1, 5, 1; etc.

Vāyavya–snāna. Bathing directly in rain water when simultaneously there is also sunshine, is called Divya-snāna. Bathing dipped under water is called Vāruṇa snāna. Cnncentration on Lord Viṣṇu is called Mānasa-snāna. Concentration upon the form of Viṣṇu, brilliant as millions of Suns, Vāmadeva, four–armed, holding Śaṅkha (conch–shell), Cakra (discus), Gadā (club), and Padma (lotus), wearing a Mukuṭa (diadem), lying on Śeṣa (King of Serpents), and full of Sattva–Guṇa, is called Mānasa–snāna. One should take his bath according to the procedures laid down in his sect so that the impurities of the body are removed. Holding a copper pot filled with Dūrvā (a grass, Panicum Dactylon) and Til (Sesamum indicum) one should take his bath for the pleasure of his Iṣṭa–devatā. First of all he should present libations of water (Tarpaṇa) to the line of Gurus, and then do the same to the Iṣṭa–devatā. In this manner it is proper for a Sādhaka to take the Mantra–snāna daily.

(अन्तःशुद्धि)

३७. अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १ ॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वगृध्नुत्वं मार्दवं ह्रीरचापलम् ॥ २ ॥
तेजः क्षमा धृतिः शौचमद्रोहो नाऽतिमानिता ।
भवन्ति सम्पदो दैव्यश्चित्तनैर्मल्यकारणम् ॥ ३ ॥
दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाऽभिजातस्य विद्यात्सम्पदमासुरीम् ॥ ४ ॥

दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।
दैवीं सम्पत्तिमासाद्य निस्त्रैगुण्यो भवेत्सुधीः ॥ ५ ॥

(Antaḥ-śuddhi)

37. Fearlessness, cheerfulness, Jñāna-yoga (that is deep confidence in the procedures of obtaining Self-knowledge), charity, control of senses, Yajña, study of Vedas and Śāstras, Tapa (austerity), simplicity, Ahiṁsā (non-violence), truth, refraining from anger, non-attachment to the fruits of action, peace of mind, discarding the evil tendencies, kindness, greedlessness, discarding egoism, feeling ashamed in committing an evil act, getting rid of fickleness of character, brilliance, mercy, patience, cleanliness, having no ill will towards others and not thinking too high of oneself—all these have been called divine wealth. Antaḥ-śuddhi is obtained by a constant practice of all these virtues. Pride, arrogance, roughness, inconsiderateness, etc. should be known as Demoniacal wealth. The aforesaid divine wealth is a means for emancipation and the demoniacal wealth keeps a man in bondage. Therefore it is proper for intelligent persons to always practice the divine wealth and thus proceed on the path of Emancipation.

आसन वर्णन

३८. प्रधानतो मन्त्रयोग आसने द्वे हितप्रदे ।
पद्मं च स्वस्तिकं चैव तथा तच्छुद्धिरुच्यते ॥ १ ॥
भेदशुद्धिक्रियाभ्यासादासनं शुद्धयति ध्रुवम् ।
यत्रास्यते साधकेन भेदास्तस्य पृथक्-पृथक् ।
वेदेषु तन्त्रेषु तथा कथिता मुनिपुङ्गवैः ॥ २ ॥

सकामाकामं भेदेनोपासनायाश्च भेदतः ।
कामनातारतम्याच्च निर्णीतान्यासनानि वै ॥ ३ ॥

धारणाशुद्धितो मन्त्रोच्चारणादपि शुद्धयति ।
आसनं तच्च द्विविधं कर्मोपासनभेदतः ॥ ४ ॥

बहुशो वर्णितं कर्मोपासनाकाण्डयोः स्फुटम् ।
निर्णीतमासनविधैर्विज्ञानं विधिपूर्वकम ॥ ५ ॥

परमात्मदर्शिभिः पूर्वैर्हठयोगविशारदैः ।
योगिनां श्रेयसे सिद्धिरासनस्य प्रकीर्त्तिता ॥ ६ ॥

DESCRIPTION OF ĀSANAS

38. Being helpful in Mantra yoga, chiefly only two postures (Āsanas) have been accepted, which are Svāstika-Āsana and Padma-Āsana. Āsana-Śuddhi (purification of Āsana) is done by differentiation of Āsana, purification of Āsana and practice of Āsana. The object on which a Sādhaka should sit has been variously specified by the sages in Vedas and Tantras. The differences in Āsanas have been determined on the basis of worship with or without desire, mode of worship, and the motive sought. The Āsana is purified by the purification of Dhāraṇā (Concentration), and recitation of Mantras. Āsana has been determined in various ways in accordance with rituals and modes of worship in the chapter dealing with these two subjects. Science of practice of Āsanas has been methodically laid down by former self-seeing sages adept in the essence of Haṭha-Yoga. Perfect accomplishment of Āsana is extremely beneficial for Yogis.

(आसन भेद)

३९. सुचैलं काम्बलं कौशं सिंहव्याघ्रमृगाजिनम् ।
एतेषामासनं शुद्धं सिद्धये वैफलाय च ॥ १ ॥
काम्यार्थं कम्बलं चैव श्रेष्ठं च रक्तकम्बलम् ।
कृष्णाजिने ज्ञानसिद्धिर्मोक्षः स्याद्व्याघ्रचर्मणि ॥ २ ॥
कुशासने भवेदायुश्चैलं व्याधिविनाशनम् ।
योगसिद्धिप्रदाने तु चैलाजिनकुशोत्तरम् ॥ ३ ॥
धरण्यां दुःखसम्भूतिर्दौर्भाग्ये दारुजासने ।
वंशासने दरिद्रः स्यात्पाषाणे व्याधिपीडनम् ॥ ४ ॥
तृणासने यशोहानिः पल्लवे चित्तविभ्रमः ।
जपध्यानतपोहानिर्वसनासनतो भवेत् ॥ ५ ॥
नादीक्षितो विशेज्जातु सिंहव्याघ्राजिने गृही ।
उदासीनवदास्येत स्नातकब्रह्मचारिभिः ॥ ६ ॥
पृथिवीमन्त्रस्य च ऋषिर्मेरुपृष्ठ उदाहृतः ।
सुतलं च तथाच्छन्दः कूर्मो देवोऽस्य कीर्त्तितः ॥ ७ ॥
आसने विनियोगः स्यादासने सुखदे विशेत् ।
जपार्चनादिकं कुर्यादन्यथा निष्फलं भवेत् ॥ ८ ॥

(Differentiation of Seat (Āsana)

39. Seats of a good piece of silken cloth, blanket, sheet made of Kuśa grass (Poa cynosuroides), lion skin, tiger-skin, and deer-skin are considered extremely pure and only these are accomplishers of the desired aims. Blanket is good for acts done from interested motives, but here the seat made of red blanket is considered best. Seat of a black deer-skin gives accomplishment of knowledge; Tiger-skin gives emancipation;

Kuśa seat gives longevity, and seat of silken cloth is destroyer of diseases. A seat prepared by placing in sequence, first, the Kuśa-āsana, then deer-skin over it, and then on the top a silken cloth, gives suceess in Yoga Sādhanā.

Now, painful or prohibited Āsanas (seats) are being described : By using earth as a seat one gets pain; by using wooden seat there is the beginning of misfortune; by using a seat made of bamboo there is poverty; by using stone seat there is suffering from disease; by using a straw seat there is loss of fame; by using a seat of leaves there is insanity, and by using a seat made of cloth there is loss of Japa, Dhyāna and Tapa. Therefore, seats of these materials are prohibited. A householder, without initiation from a Guru, should never sit on seats of lion-skin, tiger-skin and black deer-skin. A householder can sit on such seats only with the permission of a Guru. But a chaste student can sit on such seats like an indifferent person. Sitting on a proper seat reciting the name of the Ṛṣi of Pṛthivī-mantra—that is after reciting the meter etc. in order of Meru-pṛṣṭha, etc, and purifying the seat with "Asane-viniyogah", when one comfortably performs Pūjā, then he can accomplish his desired aims. Doing otherwise the performance of Sādhana becomes fruitless.

पञ्चाङ्ग सेवन वर्णन

४०. गीतासहस्रनामानि स्तवः कवचमेव च ।
हृदयं चेति पञ्चैते पञ्चाङ्गं प्रोच्यते बुधैः ॥ १ ॥

स्वोपासनानुसारेण गीतायाः पठनाद्ध्रुवम् ।
सहस्रनामाध्ययनात्स्वपद्धत्यनुसारतः ॥ २ ॥
स्तोत्रस्यकवचस्याऽपि हृदयस्य च पाठतः ।
योगसिद्धिमवाप्नोति योगी विगतकल्मषः ॥ ३ ॥
गीता पञ्चविधा प्रोक्ता पञ्चोपासनभेदतः ।
भगवत्सूर्यशक्तीनां गणेशस्य शिवस्य च ॥ ४ ॥
तथा सहस्रनामाद्या विविधाः परिकीर्त्तिताः ।
अनेकोपासनाभेदाद्विज्ञेया गुरुदेवतः ॥ ५ ॥
गीतासुवर्णितं ह्येकं जगज्जन्मादिकारणम् ।
विचित्रभावशबलं विज्ञानं ब्रह्मणः स्फुटम् ॥ ६ ॥
ब्रह्मोपासनतां यान्ति यतः पञ्चाऽप्युपासनाः ।

DESCRIPTION OF PAÑCĀÑGA-SEVANA

(Serving the Five Organs)

40. Gītā, Sahasranāma (Thousand names of the Deity), Stava, (Panegyric), Kavaca (Amulet), and Hṛdaya (Essence of knowledge) have been enumerated by the erudites as Pañcāṅga (Five Organs). By daily reading of Gīta according to one's own sect of worship and recitation of Sahasranāma, Stava, Kavaca and Hṛdaya according one's own sectarial procedures, a Yogī getting rid or impurities achieves Yoga-Siddhi (fulfilment of Yogic Aims). According to the worship of Five Deities (Pañca-devatā) the number of Gitās is also five, viz. Bhagavadgītā, Gaṇeśa-Gītā, Bhagavatī-gītā, Sūrya-gītā, and Śiva-gītā. Similarly there are five separate numbers of Sahasranāmas also.

And according to different sects of worship the Stavas, Kavacas and Hṛdayas are many, and these be

learnt from instructions of one's Guru. In all the Gītās, with reference to the cause and creation of world etc., a mysterious dispositional science of unique Brahman is described, because Pañcopāsanā (Worship of Five Deities) is nothing but Brahmopāsanā.

आचार वर्णन

४१. आचारस्त्रिविधः प्रोक्तः साधकानां मनीषिभिः ।
दिव्यदक्षिणवामाश्चाधिकाराः सप्त कीर्त्तिताः ॥ १ ॥
सप्ताधिकारा विदुषः साधकस्य मताइमे ।
दीक्षा ततो महादीक्षा पुरश्चरणमेव च ॥ २ ॥
ततो महापुरश्चर्याऽभिषेकस्तदनन्तरम् ।
षष्ठो महाभिषेकश्च तद्भावोऽन्तिम ईरितः ॥ ३ ॥
साधकोऽनेन लभते मोक्षं नाऽस्तीह संशयः ॥
एषां सप्ताधिकाराणां नामानि विविधानि वै ॥ ४ ॥
तन्त्रादिशास्त्रे कथितान्याचारस्याऽनुसारतः ।
परस्परं विप्रतीपावाचारौ वामदक्षिणौ ॥ ५ ॥
द्वयोरभिन्नलक्ष्यत्वेऽप्येकः प्रवृत्तिनिष्ठितः ।
निवृत्तिनिष्ठो ह्यपरः प्रवृत्तिर्हि निसर्गजा । ६ ॥
महाफला निवृत्तिस्तु विज्ञेया वेदवादिभिः ।
अतो ह्युपासनायां वै आचारोद्विविधो मतः ॥ ० ॥
उपासनान्तर्भावा वै त्रिविधाश्चाऽपि शुद्धयः ।
आचारैः परिचीयन्ते प्रोक्तमेतन्मनीषिभिः ॥ ८ ॥
स्वाचारभेदा विज्ञेया गुरुदेवोपदेशतः ॥
निवृत्तिमार्गपथिका रतायत्रनिसर्गतः ॥ ९ ॥
दिव्याचारः स भवति यस्तृतीयतया मतः ।
द्वौ वामदक्षिणाचारौ विरुद्धौ हि परस्परम् ॥ १० ॥

दिव्याचारो नो विरुद्धः सर्वजीवहितप्रदः ।
वामः प्रवृत्तिपरको दक्षिणस्तु निवृत्तिगः ॥
दिव्याचार उभाभ्यां वै परः श्रेयस्करो मतः ॥ ११ ॥

DESCRIPTION OF ĀCĀRAS

41. For the benefit of Sādhakas the Ācāryas have formulated three kinds of Ācāras, viz., Divya, Dakṣiṇa and Vāma. And the rights of Sādhakas have been described as seven, viz., Dīkṣā, Mahādīkṣā, Puraścaraṇa, Mahāpuraścaṇa, Abhiṣeka, Mahābhiṣeka, and Tadbhāva. Through these rights a Sādhaka doubtlessly can attain the state of emancipation. According to to Divya, Dakṣiṇa and Vāma the names of these seven rights of Sādhakas have been variously described in the Taṇtra literature, and these are current in different sects of Sādhakas. Dakṣiṇa and Vāma Acāras are mutually opposite. Although the aim of both originates from Nivṛtti (non-attachment), yet (in practice) one is Pravṛtti–inclind and the other Nivṛtti-inclind. In the disposition of men Pravṛtti (attachment) is quite natural, but Nivṛtti is highly fruitful, and therefore in worship also the description of these Ācāras can easily be seen. Āeāras are the expression of inherent dispositions and threefold purifications of worship—so has been said by the erudites. One should learn the difference of his own Ācāra from his Guru. The Ācāra in which persons fully qualified in Nivṛtti-mārga are naturally absorbed, is called Divyācāra, and this is different from the two former Ācāras. Vāma and Dakṣiṇa Ācāras are mutually opposed but Divyācāra is not opposed to either, and therefore is beneficial

to all. Vāma. ācāra is dependent on Pravṛtti and Dakṣiṇa on Nivṛtti; but Divyācāra is above both Pravṛtti and Nivṛtti. Therefore, being above conflict it is regarded as the bestower of Supreme Bliss.

(लता-साधन)

४२. उपासना-विधौ यस्तु भावो बाह्यक्रियाश्रयः ।
आचारः कथ्यते सोऽसौ तन्त्रशास्त्रप्रवर्त्तकैः ॥ १ ॥
विष्णु-सूर्य-गणेशानां शिवस्योपासनासु च ।
चतसृष्वयमाचारो भवत्येकविधः सदा ॥ २ ॥
द्विविधस्तु भवत्येष वाम-दक्षिणभेदतः ।
आचारः शक्तिपूजायां सर्वतन्त्रानुसारतः ॥ ३ ॥
शक्तिप्राधान्यतश्चाऽस्मिञ्छक्तिपूजाविधौ नृणाम् ।
साधनानां सुविस्तारः क्रियते तत्त्वदर्शिभिः ॥ ४ ॥
अधिकारोऽत्र पूजायां द्विविधो दृश्यते तथा ।
तन्त्रेषु बहुविस्तारः शक्तिपूजाविधेरभूत् ॥ ५ ॥
दक्षिणाचारतो योऽयं विपरीतो भवेदिह ।
वामाचारः स विज्ञेयस्तन्त्रशास्त्रविशारदैः ॥ ६ ॥
जनेसत्त्वप्रधाने तु दिव्याचारः प्रशस्यते ।
पश्याचारो रजोमुख्ये वामाचारश्च तामसे ॥ ७ ॥
वामाचारस्तु योऽयं वै वीराचारः स कथ्यते ।
लोककल्याणसिद्धयर्थं निर्णीतोऽसौ कलौयुगे ॥ ८ ॥
स्वां स्वां प्रकृतिमाश्रित्य जीवाः परवशाः कलौ ।
वामाचारमनुष्ठाय लप्स्यन्तेशुभमव्ययम् ॥ ९ ॥
एवं प्रवृत्तिकार्येषु निवृत्तेर्लक्ष्यतावशात् ।
नूनं प्रवृत्तिचेष्टासु घोरास्वपि च साधकः ॥ १० ॥

प्रभवेत्साधितुं सिद्धिमात्मनश्चोन्नतिं सदा ।
वामाचाररहस्यं वै ह्येतन्मुनिसमादृतम् ॥ ११ ॥
वामाचारक्रियामुख्यं लतासाधनवर्णनम् ।
विहितं तन्त्रमर्मज्ञैः, प्रायशः शक्त्युपासने ॥ १२ ॥
अन्येषु सम्प्रदायेषु युग्मोपासनवर्णना ।
विहिता यत्र, तत्रैव क्रियेयमुपवर्णिता ॥ १३ ॥

यथा द्वैविध्यमापन्नो दक्षिणाचार उच्यते ।
वामाचारे तथा चाष्टौ भेदाः प्रोक्ताहितान्त्रिकैः ॥ १४ ॥
वामाचारेऽधिकाराः स्युः सप्त वै परिकीर्तिताः ।
प्राप्यन्ते साधकैस्ते हि गुरुदेवकृपावशात् ॥ १५ ॥

महाभिषेके प्राप्नोति साधकः परिपूर्णताम् ।
शून्यो विधिनिषेधाभ्यां जीवन्मुक्तो भवेत्ततः ॥ १६ ॥
तथा गुरुकृपां प्राप्य तत्सारूप्यं प्रपद्यते ।
प्राधान्यं चात्र तत्त्वानां पञ्चानां हि विधीयते ॥ १७ ॥

गीयन्ते पञ्चतत्त्वानि शक्तिरूपाणिनिश्चितम् ।
अन्यत्र ब्रह्मरूपाणि तत्त्वानि कथितानि तु ॥ १८ ॥
अत्र सर्वं शक्तिमयं तत्साहाय्यात्परं पदम् ।
प्राप्तुं यत्नः परो लक्ष्यः साधनस्याऽस्यकीर्त्तितः ॥ १९ ॥

मनोवीर्यं तथा वायुः कारणस्थूलसूक्ष्मतः ।
भवन्ति त्वेकरूपाणि शक्तिरूपाणि चैव हि ॥ २० ॥
स्थूलशक्तिं विजित्याशु सूक्ष्मशक्तेः पराजयात् ।
कृपालाभो हि शक्तेश्च मुख्योलक्ष्योऽस्य कीर्तितः ॥ २१ ॥

शक्तेः स्थूलविभूतीनां पूजनात्तत्कृपावशात् ।
सेवनात्पञ्चतत्त्वानां साफल्यं स्यादुपासने ॥ २२ ॥

ऊर्ध्वरेतस्त्वसंप्राप्त्या मनसो वै पराजयः ।
तन्मात्राणां वशीकाराज्जित्वा सर्वाश्च वृत्तिकाः ।
स्वस्वरूपोपलब्धिर्हि लक्ष्यश्चास्यान्तिमं स्मृतम् ॥ २३ ॥

LATĀ SĀDHANA

42. The external rituals, which have been incorporated in the procedure of Upāsanā are called Ācāras by the proponents of Tantra-śāstra. These Ācāras are always identical for Viṣṇu-worship, Sūrya-worship, Gaṇeśa-worship, and Śiva-worship; but in the Śakti-worship the Ācāra, according to all Tantra-śāstras, has been differentiated as of two kinds, viz., Vāmācāra and Dakṣiṇācāra. In this Śakti-worship, due to the predominance of Śākti, the Seers of Truth have greatly elaborated the procedures, and the rights also have been laid down as two. In the Tantras there is great deal of elaboration of the Śakti-worship. The sages adept in Tantraśāstra have called Vāmācāra as that which is opposite of Dakṣiṇācāra. when the Sādhaka is Sāttvika the Divyācāra is beneficial. For a Rājasika Sādhaka Paśyācāra is beneficial, while a Tāmasika Sādhaka is qualified for Vāmācāra. Vāmācāra is also known as Vīrācāra. This has been decided to be generally beneficial in Kaliyuga. In the Kaliyuga era men, being slaves to their respective dispositions, can derive undecaying benefit from this Ācāra.

In this manner, due to the inclusion of the aims of Nivṛtti even in the Pravṛtti efforts, a Sādhaka, elevating his self, can attain Siddhis through these efforts of extreme Pravṛtti. This is the secret of Vāmācāra respected even by the Sages. Usually, it is connected

with Śakti-worship. The Tantras describe the Latā Sādhana dominated by Vāmācāra actions. But even in the four-sects of Vaiṣṇavites, etc., where the procedure or dual-worship is prevalent, this action is sporadically described in some Tantras. Just as there are two kinds of Dakṣiṇācāra, similarly the Tantrikas enumerate eight kinds of Vāmācāra. In this Ācāra there have been laid down seven rights of a Sādhaka, which he obtains from his Guru, as he gradually progresses in his Sādhanā. In the Mahābhiṣeka, a Sādhaka achieves perfection, becoming rid of ritual prohibitions enjoys emancipation, and obtaining the kindness of Guru becomes one with the Brahman. In this Ācāra there is a dominance of the Five Elements. These Five Elements are considered as endowed with Śakti. In other Ācāras everything is regarded as endowed with Brahman, but in this (Vāmācāra) everything is Śakti-maya. And attainment of Supreme state through the help of Śakti is the ultimate aim of this Ācāra. Mānas, Vāyu, Vīrya—these three causes are one in both subtle and gross forms, and are Śaktirūpa (of the form of Śakti) . Performance of Japa through Gross-Śakti and then soon progressing to Subtle-Śakti, the attainment of benediction of Śakti is the primary aim of this (Vāmācāra) Sādhanā. The worship of gross attributes of Śakti, the achievement of the favour of these attributes, attainment of success in Upāsanā through the service of the Five Elements, conquering the mental disposition through the attainment of chastity, conquest of tendencies through taming of Tanmātras, and attainment of Selfhood

through the favour of Nature, is the ultimate aim of this Sādhanā.

(सप्त-अधिकार)

४३. यदोपदिशते मन्त्रं शिष्यं कृत्वा दया गुरुः ।
स एव दीक्षासंस्कारोवर्णितो मुनिपुङ्गवैः ॥ १ ॥
ततस्तु साधकं योग्यं ज्ञात्वा प्रारभते गुरुः ।
गुरुलक्ष्यसमायुक्ताः क्रिया योगस्य शोभनाः ॥ २ ॥
उपदेष्टुं निजं शिष्यं तदा नद्धं प्रतिज्ञया ।
कथितेयं महादीक्षा तन्त्रशास्त्रविशारदैः ॥ ३ ॥
गुरुलक्ष्यसमायुक्तसाधनेनेह साधकः ।
येन क्रमेण संसिद्धिं मन्त्रस्यामोति शर्म्मदाम् ॥ ४ ॥
तदेवाऽत्र महाधीभिः पुरश्चरणमीरितम् ।
ग्रहणादिशुभे काले रीत्या सामान्यया किल ॥ ५ ॥
क्रियते यो मन्त्रजपः तत्पुरश्चरणं मतम् ।
क्रियाविशेषसंसाध्या कालसाध्योपदेशतः ॥ ६ ॥
साध्या च या पुरश्चर्य्या सा महादिः प्रकीर्तिता ।
लब्ध्वा सिद्धिं पुरश्चर्य्याद्वारा साधक उन्नतः ॥ ७ ॥
अधिकारी यदा जातः सद्गुरोः कृपया तदा ।
योग्यं ज्ञात्वाऽऽनन्दराज्ये रहस्यमनुशास्ति तम् ॥ ८ ॥
एषोऽभिषेको विद्वद्भिस्तान्त्रिकैः परिकीर्तितः ।
पञ्चदेवात्मकाः पञ्च सम्प्रदाया श्रुताः त ॥ ९ ॥
श्रूयन्तेऽस्यैव नामानि तेषु नूनं पृथक् पृथक् ।
अत्युन्नतैस्तु संस्कारैः संस्कृतं साधकं गुरुः ॥ १० ॥
स्वस्मिन्यदा मेलयति स महादिः प्रकीर्तितः ।
आध्यात्मिकोन्नतिद्वारोच्चावस्थां प्राप्य साधकः ॥ ११ ॥

नामरूपैकताज्ञाने सामर्थ्यं लभते बहु ।
सर्वोत्तमाधिकारोऽयं बुधैस्तद्भाव ईर्यते ॥ १२ ॥
साधकोऽनेन भावेन स्वेष्टदेवैकतां दृढाम् ।
संस्थाप्याऽन्ते महाभावं लभते ब्रह्मविन्मतम् ॥ १३ ॥

SEVEN ADHIKĀRAS or RIGHTS

43. When showing favour a Guru instructs the Devatā and Mantra to the Śiṣya then that ritual is called Initiation (Dīkṣā) (1). After this, considering the Sādhaka as deserving, when the Guru starts iustructing the Yoga-kriyās embodying his aims along with practical procedures besides binding the Śiṣya with vows, then this second and higher right is called Mahādīkṣā (2). The procedure embodying the aims of the Guru with which the Sādhaka gradually attains Mantra-siddhi, is called Puraścaraṇa (3). That Puraścaraṇa which is done according to the ordinary procedures during auspicious occasions of Eclipses etc., is connoted by the word "Puraścaraṇa". And that Puraścaraṇa which is performed with special rites, at special times, and through instructions, is called "Mahāpuraścaraṇa". (4). With the attainment of Siddhis through Puraścaraṇa a Sādhaka qualifies for still higher rights. When the Guru considers a Śiṣya worthy of receiving secret instructions regarding procedures of Sādhanā, then revealing these secrets to the Śiṣya a Guru entitles him (Śiṣya) to the kingdom of bliss. This procedure is called Abhiṣeka (Consecration) (5). In the respective sects of the worship of Five Deities this Abhiṣeka has been given different names. When through most developed rituals the Guru,

making the Śiṣya like himself, assimilates him within himself then this is called Mahābhiṣeka (6) or Great Consecration. In some Tantras this is known as Pūrṇābhiṣeka (Complete Consecration). Through spiritual progress when a worshipper, achieving the highest state, becomes capable of obtaining the unity of name and form, then that best of all rights is called Tadbhāva (Becoming that) (7). Through this Bhāva the Sādhaka begins to manifest a unity with his Iṣṭa-Devatā, and through this very state he attains the Mahābhāva or the Samādhi of Mantra-yoga.

(धारणा-वर्णन)

४४. बाह्याऽऽभ्यन्तरभेदेन धारणाद्विविधा मता ।
सहायतां प्रकुरुते मन्त्रयोगे हि धारणा ॥ १ ॥
बाह्यवस्तुमनोयोगाद बाह्य भवति धारणा ।
अन्तर्जगत्सूक्ष्मद्रव्ये मनोयोगान्मताऽपरा ।
श्रद्धायोगसमभ्यासात्स्फुटं सिध्यति धारणा ॥ २ ॥

DESCRIPTION OF DHĀRAṆĀ OR CONCENTRATION

44. With the differentiation of External and Internal, Dhāraṇā is of two kinds. Dhāraṇā is of extreme help in Mantra-yoga. Through Concentration of mind in external objects one attains the Bahirdhāraṇā (External Concentration), and through concentration of mind upon subtle-most objects of innermost world, one attains Antardhāraṇā (Internal Concentration). The perfect accomplishment of Dhāraṇā originates from faith and Yoga.

(धारणाऽधिकार वर्णन)

४५. धारणासिद्धिमासाद्य सिद्धिं वै ध्यानमन्त्रयोः ।
प्राप्नोति साधको नित्यं मन्त्रयोगपरायणः ॥ १ ॥
भक्तिर्जपस्य ससिद्धिराचारः प्राणसंयमः ।
साक्षात्कारो देवताया दिव्यदेशेषु नित्यशः ॥ २ ॥
देवशक्तिविकाशो वै हीष्टदर्शनमेव च ।
लभ्यन्ते धारणासिद्ध्या सर्वाणीति विनिश्चयः ॥ ३ ॥
स्थूलसूक्ष्मक्रिया या वै धारणासिद्धिलब्धये ।
विज्ञेया योगमर्मज्ञाद् गुरुदेवाद्यथाविधि ॥ ४ ॥

(DESCRIPTION OF RIGHTS OF DHĀRAṆĀ)

45. By a perfect accomplishment of Dhāraṇā a Yogi can achieve Mantra-sīddhi and Dhyāna-siddhi (accomplishment of Meditation). Bhakti, Ācāra, Prāṇa-saṁyama (control of vital breaths), Japa-siddhi, Devatā-sānnidhya (proximity with the Deity), manifestation of Divine power in Divyadeśa, etc., and the vision of Iṣṭa-devatā, are all obtainable only through the perfect accomplishment of Dhāraṇā. There are various gross and subtle practices for the accomplishment of Dhāraṇā, which should be poperly learnt from a Guru.

(मन्त्रों के दस संस्कार)

४६. जननं जीवनं पश्चात्ताडनं बोधनं तथा ।
अथाऽभिषेको विमलीकरणाऽऽप्यायने पुनः ॥ १ ॥
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ।
मन्त्राणां मातृकायन्त्रादुद्धारो जननं स्मृतम् ॥ २ ॥

स्वर्णादि पात्रे संलेख्य मातृकायन्त्रमुत्तमम् ।
कश्मीरचन्दनेनाऽपि भस्मना वाऽथ सुव्रते ॥ ३ ॥
काश्मीरं शक्तिसञ्चारे चन्दनं वैष्णवे मनौ ।
शैवे भस्म समाख्यातं मातृकायन्त्रलेखने ॥ ४ ॥
मन्त्रोष्टदलपद्मो हि कार्यः पूर्वं यथाविधि ।
कादिमान्ताः पञ्चवर्गा दिक्षु पूर्वादितो न्यसेत् ॥ ५ ॥
योदिवान्ताः शादिहान्ता लक्षमीशे प्रविन्यसेत् ।
चतुरस्रं चतुर्द्वारं दिक्षु बं ठं विदिक्षु च ॥ ६ ॥

(अपिच)

व्योमेन्द्वौरसनार्णकर्णिकमचां द्वन्द्वै स्फुरत्केसरम् ।
वर्गोल्लासिवसुच्छदं वसुमतीगेहेन संवेष्टितम् ॥ १ ॥
पंङ्क्तिक्रमेण विधिना जननं वै विधीयते ॥ २ ॥
प्रणवाऽन्तरितान्कृत्वा मन्त्रवर्णाञ्जपेत्सुधीः ।
प्रत्येकं शतवारं तु जीवनं तदुदीरितम् ॥ ३ ॥
मन्त्रवर्णान्समालिख्य ताडयेच्चन्दनाऽम्भसा ।
प्रत्येकं वायुबीजेन पूर्ववत्ताडनं मतम् ॥ ४ ॥
विलिख्य मन्त्रवर्णांस्तु प्रसूनैः करवीरजैः ।
तन्मन्त्रवर्णसङ्ख्याकैर्हन्याद्रेफेण बोधनम् ॥ ५ ॥
विलिख्याऽक्षरसंख्यातैरक्तपुष्पहयाऽरिभिः ।
मन्त्रवर्णान्वह्निनैकमभिमन्त्र्य सकृत्सकृत् ॥ ६ ॥
तत्तन्मन्त्रोक्त विधिनाऽभिषेकस्तु प्रकीर्त्तितः ।
अश्वत्थपल्वैःसिञ्चेन्मन्त्री मन्त्रार्णसंख्यया ॥ ७ ॥
सञ्चिन्त्य मनसा मन्त्रं सुषुम्नामूलमध्यतः ।
ज्योतिर्मन्त्रेण विधिवद्हेन्मलत्रयं यती ॥ ८ ॥

तारं व्योमाऽग्निमनुयुग्दण्डी ज्योतिर्मनुर्मतः ।
स्वर्णेन कुशतोयने पुष्पतोयने वा तथा ॥ ९ ॥
तेन मन्त्रेण विधिवदाप्यायनविधिः स्मृतः ॥ १० ॥
मन्त्रेणवारिणा मन्त्रे तर्पणं तर्पणं मतम् ।
मधुना शक्तिमन्त्रेषु वैष्णवे चेन्दुमज्जलैः ॥ ११ ॥
शैवेघृतेन दुग्धेन तर्पणं सभ्यगीरितम् ॥ १२ ॥
तारमायारमायोगो मनोर्दीपनमुच्यते ।
जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम् ॥ १३ ॥
संस्कारा दशसम्प्रोक्ताः सर्वतन्त्रेषु गोपिताः ।
मान् कृत्वा सम्प्रदायेन मन्त्री वाञ्छितमाप्नुयात् ॥ १४ ॥

TEN SAṂSKĀRAS (RITUALS) OF MANTRA

46. Janana, Jīvana, Tāḍana, Bodhana, Abhiṣeka, Vimalikaraṇa, Āpyāyana, Tarpaṇa, Dīpana, and Gupti are the ten rituals through which a Mantra is made efficacious. Extrication of the letters of Mantra through Matṛkā-yantra is called Janana. A Mātṛkā-yantra is drawn by Kesara (filaments of a flower, of the plants Rottleria Tinctoria, Mimusops Elengi, and Meusa ferrea), Candana (Sandal, Sirium myrtifolium), or Bhasma (ash) on a plate of Gold, etc. Drawing this Yantra with Kesara in Śakti-worship, with Candana in Viṣṇu-worship, and with Bhasma in Śiva-worship is specially useful.

Procedure for drawing a Mātṛka-Yantra : After drawing an eight petalled lotus, eight set of letters (Aṣṭavarga) should be entered in their order in these eight petals. Outside the lotus, drawing four gates and four angles, the lotus should be enclosed. On the four

corners of Yantra the Mantra "Ṭhaṁ" and on the gates Mantra "Baṁ" should be written. Vyoma or Hakāra, Indu or Sakāra, Aukāra, Rasanārṇa or Visarga—all these combined in the form of "Hsyauḥ" (ह्स्यौः) Mantra should then be placed in the pericarp of the lotus. Then, with two vowels in each the eight filaments of the lotus should be completed—entering two vowels in each, and then these filaments should be enclosed by a circle.

MĀTṚKĀ-YANTRA



When the letters quoted by the Mātṛkā-yantra in the aforesaid manner, are written in a line their respective order, and when a 100 or less Japa is performed of each letter affixed with Praṇava, then this is called Jīvana.

Writing each letter of the Mantra separately, when they are individually struck with Sandal-water accompanied by Baṁ Mantra then this ritual is called, by the sages, Tāḍana.

Writing the letters of Mantra separately when according to the numbers of the letters of Mantra the letters are beaten with flowers of red oleander (Nerium Odorum) with the accompaniment of Raṁ Mantra the ritual is called Bodhana.

Writing the letters of Mantra when according to the number of letters of Mantra each letter is consecrated by red oleander flowers accompanied by Raṁ Mantra, and after that according to the number of letters of the Mantra the letters are again bathed with a leaf of Aśvattha (Ficus Religiosa) then the ritual is called Abhiṣeka.

Contemplating the Mantra in the root-part and mid-part of Suṣumnā (Spinal cord) when the three impurities are burnt with "Oṁ Hrauṁ" Mantra the ritual is called Vimalīkaraṇa. (The impurity which is produced in women is called "Māyika", that produced in men is called "Karmaṇā" and that produced by the interaction of both is called "Ānavya". These three impurities are obstacles in Sādhanā.)[1]. Tārā = Oṁ; Vyoma = Ha; Agni = Ra; Manu = Au; and Daṇd = M; All these combine to make "Om Hrauṁ" which is called 'Jyotirmantra'. With accompaniment of

1. Malatraya :—

आनव्यं कार्मणं मायिकं चेति मलत्रयम् ।
मायिको नाम योषोत्थं पौरुषं कार्मणं मलम् ।
आनव्यं तद्द्वयं प्रोक्तं निषिद्धं तन्मलत्रयम् ॥

the Jyotirmantra (Om Hraum) when the letters of a Mantra are satiated properly in Gold water or Kusa (Poa Cynosuroides) water or flower water the ritual is called "Apyāyana" . Offering libations of water to the Mantra with the accompaniment of the aforesaid Mantra (Jyotirmantra) is called Tarpaṇā. The Śāstras have laid down that Tarpaṇa of a Śakti-mantra is done with honey, a Viṣṇu-mantra with Camphor mixed water, and Śiva-mantra with milk.

Tārā = Om; Māyā = Hrīm; and Rāma = Śrim— That is when illumination of a Mantra is performed with "Om Hrīm Śrīm" the ritual is called "Dīpana". And keeping that Mantra as extra-secret with which Japa is being performed is designated with the ritual "Gupti" .

These are the Ten Saṁskāras of Mantras which are held very secret in the Tantras. According to one's respective sect the Mantrin performing Japa of a Mantra purified by these ten Saṁskāras, obtains the desired fruit.

अथ दिव्यदेश वर्णनम्

४७. यथा गवां सर्वशरीरजं पयः
पयोधरान्निःसरतीह केवलम् ।
तथा परमात्माऽखिलगोऽपिशाश्वतो
विकाशमाप्नोति स दिव्यदेशकैः ॥ १ ॥
तन्त्रेषु दिव्यदेशाः षोडशा प्रोक्ता यथाऽत्र कथ्यन्ते ।
अग्न्यम्बुलिङ्गवेद्यो भित्तौरेखा तथा च चित्रं च ॥ २ ॥
मण्डलविशिखौ नित्ययन्त्रं पीठं च भावयन्त्रं च ।
मूर्तिर्विभूतिनाभी हृदयं मूर्धा च षोडशैतेस्युः ॥ ३ ॥

यथाधिकारं लभते दिव्यदेशेष्वुपासनाम् ।
योगसिद्धयुपलब्धौ हि सहकारितया मता ॥ ४ ॥
धारणासहकारेण दिव्यदेशे प्रकाशते ।
इष्टदेवो मन्त्रयोगे दिव्यदेशो हितप्रदः ॥ ५ ॥
वेदेषु तन्त्रशास्त्रेषु दिव्यदेशस्य वर्णना ।
भेदश्च वर्णितो विज्ञैर्विस्तरेण महात्मभिः ॥ ६ ॥
कुर्यादावाहनं मूर्तौ मृण्मयादौ सदैव हि ।
प्रतिमायां जले वह्नौ नावाहनविसर्जनं ॥ ७ ॥

DESCRIPTION OF DIVYADEŚA

47. Just as milk pervading the entire body of a cow comes out only through her udder, so also the Supreme Ātmā, though all-pervasive, develops only in the Divya-deśas (divine places). Tantras enumerate sixteen Divya-deśas, viz., Vahni, Ambu, Liṅga, Sthaṇḍila, Kuṇḍya, Paṭa, Maṇḍala Viśikha, Nityayantra, Bhāva-yantra, Pīṭha, Vigraha, Vibhūti, Nābhi, Hṛdaya, and Mūrdhā. A Sādhaka is instructed to worship in any of these Divya-deśas according to his qualifications. All these are extremely helpful in obtaining Yoga-siddhi. With the help of Dhāraṇā the Iṣṭadevatā manifests in the Divya-deśas. Divya-deśasevana is extremely beneficial in Mantrayoga. Detailed descriptions and the kinds of Divyadeśas have been variously given in the Vedas and Tantras. It is proper to start worship only after first invocating the Deity in earthen (etc.) idols. But invocation and discharge is not needed in case of a consecrated idol, in Agni purified with rituals, and in water.

अथ प्राणक्रिया वर्णनम्

४८. मनः प्राणा मरुच्चैतेऽभेदसम्बन्धयोगिनः ।
कार्यकारणरूपत्वं वायोः प्राणस्य चेष्यते ॥ १ ॥
अतः प्राणक्रियायोगयुक्ता न्यासाः प्रकीर्त्तिताः ।
प्राणायामस्य भेदा वै वर्णिता हठयोगिभिः ॥ २ ॥
मन्त्रयोगेऽपि सहितः प्राणायामो विधीयते ॥ ३ ॥
मन्त्रयोगे तथा केचिदाचार्या वै प्रचक्षते ।
प्राणायामो हि सहजः सर्वलोकहितप्रदः ॥ ४ ॥
न्यासा यद्यपि बहवः परं तत्र प्रधानता ।
सप्तानां ते तु विज्ञेया गुरुदेवोपदेशतः ॥ ५ ॥
साधारणोपासनायां करन्यासाङ्गन्यासकौ ।
उपकारितया प्रोक्तौ विस्तरोपासनासु तु ।
ऋष्यादिमातृकान्यासो ह्यनुष्ठेयतया मतः ॥ ६ ॥
दिग्दर्शनार्थं न्यासस्य प्राणायामस्य चैव हि ।
विन्यस्यतेऽवबोधाय तथोदाहरणं स्फुटम् ॥ ७ ॥

PRĀṆA-KRIYĀ

48. Mana, Prāṇa and Vāyu—all these three are bound into one relationship. Vāyu and Prāṇa are of the nature of Cause and Effect and therefore the Nyāsa has an unitary relationship with Prāṇāyāma. Detailed varieties of Prāṇāyāma have been given by Ācāryas of Haṭha-yoga. In Mantra-yoga also the Sahita-Prāṇāyāma has been adopted which is exteremely beneficial. Some Ācāryas have also advocated the Sahaja-Prāṇāyāma.

Nyāsa is of many kinds, but out of these only seven are considered important and they may be learnt from the Guru according to one's qualifications. In ordinary worship Kara-nyāsa and Aṅga-nyāsa only are useful.

In elaborate worship, however, Ṛṣi-nyāsa and Mātṛkā-nyāsa should always be performed. The examples of these are being given below.

(प्राणायामवर्णनम्)

४९. यदा प्राणं समारोप्य पूरयित्वोदरस्थितम् ।
प्रणवेन सुसंयुक्तां व्याहृतिभिश्च संयुताम् ॥ ८ ॥
गायत्रीं च जपेद्विप्रः प्राणसंयमने त्रयम् ।
पुनश्चैवं त्रिभिः कुर्यात् पुनश्चैवं त्रिसन्धिषु ॥ ९ ॥

DESCRIPTION OF PRĀṆĀYĀMA

49. Withdrawing the Prāṇa from external objects of senses, it should be filled in the stomach. Then the Sādhaka should perform three times the Japa of Gāyatri-mantra associated with Praṇava and Vyāhṛti. And then again, performing Japa of Gāyatri-mantra thrice in each of the Sandhis (joints), he should complete the Prāṇāyāma.

(वाह्यमातृकान्यासः)

५०. ललाटेऽनामिकामध्ये विन्यसेन्मुखपङ्कजे ।
तर्जनीमध्यमानामा वृद्धानामे च नेत्रयोः ॥ १० ॥
अङ्गुष्ठं कर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः ।
मध्यास्त्रिस्रो गण्डयोस्तु मध्यमाश्चोष्ठयोर्न्यसेत् ॥ ११ ॥
अनामां दन्तयोर्न्यस्य मध्यमामुत्तमाङ्गके ।
मुखेऽनांमां मध्यमाश्च हस्तपादेषु पार्श्वयोः ॥ ११ ॥
कनिष्ठानामिकामध्यास्तास्तु पृष्ठे च विन्यसेत् ।
ताः साङ्गुष्ठा नाभिदेशे सर्वाः कुक्षौ च विन्यसेत् ॥ १३ ॥
हृदये च तलं सर्वमसयोश्च ककुत् स्थले ।
हृन्पूर्व्वं हस्तपत्कुक्षिमुखेषु तलमेव च ॥ १४ ॥

एतास्तु मातृकामुद्राः क्रमेण परिकीर्तिताः ।
आज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य निष्फलः ॥१५॥
ललाटे मुखनेत्रे च श्रुतिघ्राणे च गण्डयोः ।
ओष्ठदन्तोत्तमाङ्गास्यदोः पत्सन्ध्यग्रकेषु च ॥ १६ ॥
पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेऽसके ।
ककुद्यंसे च हृत्पूर्वं पाणिपादयुगे तथा ॥
जठराननयोर्न्यस्येन्मातृकार्णान् यथाक्रमात् ॥ १७ ॥
ओमाद्यन्तो नमोऽन्तो वा सबिन्दुर्बिन्दुवर्जितः ॥
पञ्चाशद्वर्णविन्यासः क्रमादुक्तो मनीषिभिः ॥ १८ ॥

BĀHYA-MĀTṚKĀ-NYĀSA

50. One should perform Nyāsa (placing the tips of the fingers and palm of the right hand on various parts of the body accompanied by particular Mantras), in the forehead with ring-finger (Anāmikā) and middle finger (Madhyamā); in the mouth with the fore-finger (Tarjanī), middlefinger and ring finger; in the eyes with the thumb and ring finger; in the two ears with the thumb; in the two nostrils with the thumb and the little finger; on the cheeks with the fore, middle and ring fingers; on the two lips with middle finger; in the two rows of teeth with ring finger; on the Uttamāṅga (the head) with middle finger; inside the mouth with the ring and middle fingers; on the hands, legs and the two sides with little, ring and middle fingers; on the back with little, ring and middle fingers; in the navel with the little, ring and middle fingers and thumb; on the stomach with all the fingers; and in the Antaḥkaraṇa, two shoulders and Kakud (hump

portion) with the palm. From heart to hands, from heart to legs, from heart to the belly, and from heart to mouth it is proper to perform Nyāsa with palm. These Mātṛkā-Mudrās have been laid down in a sequence. The Nyasa of a person, who does not know this, becomes fruitless.

Forehead, face, both eyes, both ears, both nostrils, both cheeks, both lips, both the rows of teeth, head, mouth, joints of arms and feet, fore legs and fore arms, both sides, back, navel, belly, heart, right shoulder, space between the shoulders on the back of the neck (Kakuda-sthāna), léft shoulder, from heart to hands, from heart to legs, from heart to belly, and from heart to mouth—all these are the organs of the body where one has to perform Nyāsa of the Mātṛkās (Fifty letters of the Sanskrit alphabet) with order of enumeration of these organs. The sages have laid down that Nyāsa should be performed with the fifty letters putting Praṇava at the beginning and Namaḥ at the end of each letter pronounced either with Bindu or without Bindu.

(मातृकान्यासः)

५१. मातृकां शृणु देवेशि न्यसेत् पापनिकृन्तनीम् ।
ऋषिर्ब्रह्मास्य मन्त्रास्य गायत्रीछन्द उच्यते ॥ १९ ॥
देवता मातृकादेवी बीजं व्यञ्जनमुच्यते ।
शक्त्यस्तु स्वरा देवि ! षडङ्गन्यासमाचरेत् ॥ २० ॥
अं आं मध्ये कवर्गान्तु इं ईं मध्ये चवर्गकम् ।
उं ऊं मध्ये टवर्गन्तु एं ऐं मध्ये तवर्गकम् ॥ २१ ॥
ओं औं मध्ये पवर्गन्तु, विन्दुयुक्तं न्यसेत् प्रिये ॥ २२ ॥

अनुस्वाराद्विसर्गान्तौ यशवर्गौ सलक्षकौ ।
हृदयञ्च शिरो देवि शिखा कवचकं तथा ॥ २३ ॥
नेत्रमस्त्रं न्यसेन् ङेन्तं नमः स्वाहा क्रमेण तु ।
वषट् हुँ वौषडन्तञ्च फडन्तं योजयेत् प्रिये ॥ २४ ॥
षडङ्गोऽयं मातृकायाः सर्वपापहरः स्मृतः ।
एकैकवर्णमुच्चार्य मूलाधाराच्छिरोऽन्तकम् ॥ २५ ॥
नमोऽन्त इति विन्यास आन्तरः परिकीर्त्तितः
अथान्तर्मातृकान्यासो मूलाधारे चतुर्दले ।
सुवर्णाभे वशषसचतुर्वर्णविभूषिते ॥ २६ ॥
षड्दले वैद्युतनिभे स्वाधिष्ठानेऽनलत्विषि ।
बभेमैर्यरलैर्युक्ते वर्णैः षड्भिश्च सुव्रते ॥ २७ ॥
मणिपूरे दशदले नीलजीमूतसन्निभे ।
डादिफान्तदलैर्युक्ते विन्दूद्भासितमस्तकैः ॥ २८ ॥
अनाहते द्वादशारे प्रवालरुचिसन्निभे ।
कादिठान्तदलैर्युक्ते योगिनां हृदयङ्गमे ॥ २९ ॥
विशुद्धेषोडशदले धूम्राभे स्वरभूषिते ।
आज्ञाचक्रे तु चन्द्राभे द्विदले हक्षलाञ्छिते ॥ ३० ॥
सहस्रारे हिमनिभे सर्ववर्णविभूषिते ।
अकथादित्रिरेखात्महलक्षत्रयभूषिते ॥ ३१ ॥
तन्मध्ये परविन्दुञ्च सृष्टिस्थितिलयात्मकम् ।
एवं समाहितमना ध्यायेन्न्यासोऽयमान्तरः ॥ ३२ ॥

MĀTṚKĀ-NYĀSA

51. Śiva says : "O Devi : listen to Mātṛkā-nyāsa. All the sins are destroyed by performing these Mātṛkā-nyāsas. The Ṛṣi of the Mātṛkā Mantra is Brahmā; its

Chanda is Gāyatrī; its Devatā is Mātṛkā Devī; its seeds (Bījas) are the consonants and all the vowels are its Śakti. The procedure is to perform Ṣadaṅga-nyāsa (placing Mātṛkās on six limbs or organs of body) after pronouncing the said Mātṛkās. Taking Aṁ, Āṁ, and placing between them the letters of 'Kavarga' with Bindus; taking Iṁ, Īṁ and placing between them the letters of 'Cavarga' with Bindus; taking Uṁ Ūṁ and placing between them the letters of 'Ṭavarga' with Bindus; taking Eṁ, Aiṁ and placing between them the letters of 'Tavarga' with Bindus; taking Oṁ, Auṁ and placing between them the letters of 'Pavarga' with Bindus; and taking Ṁ, Aḥ and placing between them letters of Yavarga, Savarga, La, and Kṣa with Bindus; one should then put the words Hṛdaya, Sira, Śikhā, Kavaca, Netra, and Astra in their Caturthī form (fourth case), respectively after each of the sets of letters specified; and then again, after each set so formed the words Namaḥ, Svāhā, Vaṣaṭa, Huṁ, Vauṣaṭ, and Phaṭ should be placed respectively. Now, Nyāsa of each organ of the body (viz. heart head, crownlock, Kavaca, eyes, and front and back of the palm) is performed by pronouncing the respective set of Mantras formed in the above manner. This Ṣnḍaṅga-Nyāsa destroys the sins of the Sādhaka. Pronouncing each letter with Bindu and placing word Namaḥ at its end (for example Kaṁ Namaḥ, etc.) when Nyāsa is performed from Mūlādhāra upwards it is called Antarmātṛkā-nyāsa. For example, one should form the mental disposition of Mūlādhāra Cakra as golden and four-petalled containing the letters Va. Śa, Ṣa, and Sa,

each with Bindu (viz. Vaṁ, Śaṁ, Ṣaṁ, Saṁ, etc.); of Svādhiṣṭhāna Cakra as bright and brilliant like lightning and Agni, of six petals embelished with the letters Ba, Bha, Ma, Ya, Ra, La, each with Bindu; of Maṇipūra Cakra like blue clouds with ten petalled lotus embelished with Ḍa, Ḍha, Ṇa, Ta, Tha, Da, Dha, Na, Pa, Pha, each with Bindu; of Anāhata Cakra situated in the heart of Yogis brilliant like Pravāla (coral gem), twelve-petalled containing the letters Ka, Kha, Ga, Gha, Ṅa, Ca, Cha, Ja, Jha, Ña, Ṭa, Ṭha, each with Bindu; of Viśuddhi Cakra of smoky brilliance with sixteen vowels, each with Bindu; of Ājñā Cakra brilliant like Moon, with two petals, containing the letters Ha and Kṣa each with Bindu; and of Sahasrāra Cakra of snow-white brilliance, with thousand petals containing all the letters, and the three letters Ha, La, Kṣa with Bindu, situated on the three Akathādi lines. In the middle of this, one should contemplate with composed mind the Parabindu (Paraṁ Siva) who is the cause of all Creation and Dissolution.

(ऋष्यादिन्यास)

५२. महेश्वरमुखाज ज्ञात्वा यः साक्षात् तयसा मनुं ।
संसाधयति शुद्धात्मा स तस्य ऋषिरीरितः ॥
गुरुत्वान्मस्तके चाऽस्य न्यासस्तु परिकीर्तितः ॥ ३३ ॥
सर्वेषां मन्त्रतत्त्वानां छादनाच्छन्द उच्यते ।
अक्षरत्वात्पदत्वाच्चमुखे छन्दः समीरितम् ॥ ३४ ॥
सत्वेषामेव जन्तूनां भाषणात्प्रेरणात्तथा ।
हृदयाम्भोजमध्यस्था देवता तत्र तां न्यसेत् ॥ ३५ ॥

ऋषिश्छन्दोऽपरिज्ञानान्न मन्त्रफलभाग् भवेत् ॥
दौर्बल्यं याति मन्त्राणां विनियोगमजानताम् ॥ ३६ ॥
ऋषिं न्यसेन्मूर्ध्नि देशे छन्दस्तु मुखपङ्कजे ।
देवतां हृदये चैव बीजं तु गुह्यदेशके ।
शक्तिञ्च पादयोश्चैव सर्वाङ्गे कीलंक न्यसेत् ॥ ३७ ॥

ṚṢI–NYĀSA

52. One who performs Sādhanā after learning the Mantras through austerities from the mouth of Lord Maheśvara, only that pure hearted is supposed to be the Ṛṣi of that Mantra. Due to his superiority Ṛṣi's Nyāsa is performed on the head. That which covers all the Mantra-essences is called Chanda. The Nyāsa of Chanda should be performed in the mouth, because Chanda is of the nature of spoken letters and words. Nyāsa of the Deity who, situated in the lotus of hearts of all the men, motivates all men to speak, should be performed in the heart-lotus. A Mantra is never fruitful when one does not know the Ṛṣi and Chanda. The power of Mantras decreases when one does not know their Viniyoga (application).

The Nyāsa of Ṛṣi should be performed in the head, of Chanda in the mouth, of the Deity in the heart; of the Bīja in the hidden part (that is, Anus), of Śakti in the feet; and of Kīlaka (that is, that which comes at the end or closes) in the whole body.

(मुद्रा वर्णन)

५३. मोदनात् सर्वदेवानां द्रावणात् पापसन्ततेः ।
तस्मान्मुद्रेति विख्याता मुनिभिस्तंत्रवेदिभिः ॥ १ ॥

अथ मुद्राः प्रवक्ष्यामि सर्वतन्त्रेषुकल्पिताः ।
याभिर्विरचिताभिश्च मोदन्ते मन्त्रदेवता ॥ २ ॥
अर्चने जपकाले च ध्याने काम्ये च कर्मणि ।
स्नाने चाऽऽवाहने शङ्खे प्रतिष्ठायां च रक्षणे ॥ ३ ॥
नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशिते ।
स्थाने मुद्रा प्रद्रष्टव्याः स्वस्वलक्षणलक्षिताः ॥ ४ ॥
आवाहन्यादिका मुद्रा नव साधारणी मता ।
तथा षडंगमुद्राश्च सर्वमन्त्रेषु योजयेत् ॥ ५ ॥
एकोनविंशतिर्मुद्रा विष्णोरुक्ता मनीषिभिः ।
शङ्ख-चक्र-गदा-पद्म-वेणु-श्रीवत्स-कौस्तुभाः ॥ ६ ॥
वनमाला तथा ज्ञानमुद्रा विल्वाऽऽह्वया तथा ।
गरुडाख्या परा मुद्रा विष्णोः सन्तोषवर्धिनी ॥ ७ ॥
नारसिंही च वाराही हायग्रीवी धनुस्तथा ।
बाणमुद्रा च परशुर्जगन्मोहनिका परा ॥ ८ ॥
काममुद्रा पराख्याता शिवस्य दश मुद्रिकाः ।
लिङ्गयोनित्रिशूलाख्या मालेष्टाभीमृगाऽऽह्वयाः ॥ ९ ॥
खट्वाङ्गा च कपालाख्या डमरुः शिवतोपदाः ।
सूर्यस्यैकैव पद्माख्या सप्त मुद्रा गणेशितुः ॥ १० ॥
दन्तपाशाङ्कुशा विघ्नपरशुलज्जुसंज्ञिताः ।
बीजपूराऽऽह्वया मुद्रा ज्ञेया विघ्नेषपूजने ॥ ११ ॥
पाशांकुशवराभीतिखड्गचर्मधनुः शरा ।
मौशली मुद्रिका दौर्गी मुद्राः शक्ते प्रियंकराः ॥ १२ ॥
लक्ष्मीमुद्रार्चने लक्ष्म्या वाग्वादिन्याश्च पूजने ।
अक्षमाला तथा वीणा व्याख्या पुस्तकमुद्रिकाः ॥ १३ ॥

सप्तजिह्वाऽऽह्वया मुद्रा विज्ञेया वह्निपूजने ।
मत्स्यमुद्रा च कूर्माख्या लेलिहा मुण्डसंज्ञिका ॥ १४ ॥

महायोनिरितिख्याता सर्वसिद्धिसमृद्धिदा ।
शक्त्यर्चने महायोनिः श्यामादौ मुण्डमुद्रिका ॥ १५ ॥

मत्स्यकूर्मलेलिहाख्या मुद्रा साधारणी मता ।
तारार्चने विशेषास्तु कथ्यन्ते पञ्च मुद्रिका ॥ १६ ॥

योनिश्च भूतिनी चैव बीजाख्या दैत्यधूमिनी ।
लेलिहानेति संप्रोक्ताः पञ्चमुद्रा प्रकाशिताः ॥ १७ ॥

दशका मुद्रिका ज्ञेयास्त्रिपुरायाः प्रपूजने ।
संक्षोभद्रावणाकर्षवश्योन्मादमहाङ्कुशाः ॥ १८ ॥

खेचरी बीजयोन्याख्याः त्रिखण्डाः परिकीर्त्तिता ।
कुम्भमुद्राभिषेके स्यात् पद्ममुद्रासने तथा ॥ १९ ॥

कालकर्णी प्रयोक्तव्या विघ्नप्रशमकर्मणि ।
गालिनी च प्रयोक्तव्या जलशोधनकर्मणि ॥ २० ॥

श्रीगोपालार्चने वेणुर्नृहरेर्नारसिंहिका ।
वराहस्य च पूजायां वराहाख्यां प्रयोजयेत् ॥ २१ ॥

हयग्रीवार्चने चैव हायग्रीवीं प्रदर्ययेत् ।
रामार्चने धनुर्बाणमुद्रे पर्शुस्तथाऽर्चने ॥ २२ ॥

परशुरामस्य विज्ञेया जगन्मोहनसंज्ञिका ।
वासुदेवाऽऽह्वया ध्याने कुन्तमुद्रा तु रक्षणे ॥
सर्वत्र प्रार्थने चैव प्रार्थनाख्यां प्रयोजयेत् ॥ २३ ॥

यथाधिकारं शिक्षेयुः साम्प्रदायिकसाधकाः ।
गुरोर्मुद्रालक्षणानि तान्त्रिकैर्वर्णितानि वै ॥ २४ ॥

देवदेवी प्रसादाय बह्व्यो मुद्राः प्रदर्शिताः ।
या वर्णिताः पद्धतिषु तासु तासु मनीषिभिः ।
मुद्राश्च कथिताः पञ्चोपासनस्यानुसारतः ॥ २५ ॥
यथा देवप्रसादाय मुद्राभेदा निरूपिताः ।
तथर्षिप्रीणनार्थाय मुद्रा काचिन्निगद्यते ॥ २६ ॥
ज्ञानमुद्रा भक्तिमुद्रा कर्ममुद्रा तथैव च ।
तपोमुद्रा दानमुद्रा ऋषीणां तुष्टिकारिकाः ॥ २७ ॥
मुद्रावरा अभयदा प्रीणयन्ति जगत्त्रयम् ।
देवर्षींश्च पितॄंश्चापि कस्य स्यादत्र संशयः ॥ २८ ॥

DESCRIPTION OF MUDRĀS

53. Pleasure of the Deities is increased through the Mudrās and Mudrās also destroy the sins of the Sādhaka. This is the reason sages adept in Tantras have named them as Mudrā. The God of Gods, Mahādeva, says that he will now describe the Mudrās which have been incorporated in all the Tantras and the practice of which at the time of worshipping a Deity pleases the Deity of the Mantra. In worship, in Japa, in Concentrations, in Kāmya Karma (rites done to effect particular objects), at the time of bathing, at the time of invocation, in the consecration of Śaṅkha, in the life-giving (Prāṇa-pratiṣṭhā) of an Idol, in protection, in offering to a Deity and in various rites montioned in the Kalpas, the Mudrās be properly performed in accordance with the qualities of the respective rites. The nine kinds of Invocational etc., Mudrās are supposed to be general in nature. The Ṣaḍaṅga Mudrās are also useful for all purposes. The

erudites have specified nineteen Mudrās for the worship of Viṣṇu. Śaṅkha, Cakra, Gadā, Padma, Veṇu, Śrīvatsa, Kaustubha, Vanamālā, Jñāna, Bilva, Garuḍa, Nārasiṁhī, Vārāhī, Hayagrīvī, Dhanuṣ, Bāṇa, Paraśu, Jaganmohanikā, and Kāma are the name of nineteen Mudrās with which Lord Viṣṇu derives pleasure. Liṅga, Yoni, Triśūla, Mālā, Vara, Abhaya, Mṛga, Khaṭvāṅga, Kapāla, and Damaru are the ten Mudrās which please Mahādeva. For the worship of Sūrya only one, Padma mudrā, has been prescribed. Danta, Pāśa, Aṁkuśa, Vighna, Parśu Laḍḍūka, and Bījāpura are the seven Mudrās prescribed for the worship of Gaṇeśa. Pāśa, Aṁkuśa, Vara, Abhaya, Khaḍga, Carma, Dhanu, Śara, and Musala are the nine Mudrās loved by Durgā, and these should be used particularly for the worship of all kinds of Śakti. Lakṣmī Mudrā for the worship of Lakṣamī, and Akṣamāla, Viṇā, Vyākhyā and Pustaka Mudrās have been specified for the worship of Sarasvatī. The Mudrās named Saptajihvā are famous for the worship of Agni. Matsya, Kūrma Lelihā, Muṇḍa, and Mahāyoni are the Mudrās which bestow all kinds of wealth and properities. The Mahāyoni Mudra is used for the worship of Śakti Goddess; Muṇḍa Mudrā is used for the worship of Śyāma, etc., and Matsya, Kūrma, and Lelihā Mudrās are used for general worship. Yoni, Bhūtinī, Bīja, Daityadhūminī, and Lelihānā are the five Mudrās specially specified for the worship of Goddess Tārā. The ten Mudrās specified for the worship of Tripurā-Sundarī are Kṣobhinī, Drāviṇī, Ākarṣiṇī, Vaśya, Unmādinī, Mahāṁkuśā, Khecarī, Bīja, Yoni, and Trikhaṇḍa. Kumbha Mudrā is speci-

fied for the consecrational rites; Padma Mudrā is specified for Āsana; Kālakarṇī Mudrā is specified for rites connected with suppression of disturbances; and Galinī Mudrā is specified for purification of water. Veṇu Mudrā is specified for the worship of Gopāla, and Nārsiṁhī for the worship of Nṛsiṁha. In the worship of Varāha the Vārāhī and in the worship of Hayagrīva the Hayagrīvī Mudrās should be exhibited. For the worship of Śri Rāma the Dhanuṣ and Bāṇa Mudrās have been considered proper. The Mudrās specified for the worship of Paraśurama are Parśu and Sammohinī. For the invocational rites the Vāsudeva; for the preservational rites the Kumbha, and for prayer the Prārthanā Mudrās should be performed. According to their rights and qualification the Sādhakas of all the five sects should learn the respective Mudrās from their Gurus. The detailed characteristics of all the Mudrās are given in the Tantras. There are various Mudrās which please the Deities and the descriptions obtainable from different worshipping procedures. Here only names, and that too of only a few Mudras have been described in accordance with the worship of Five Deities. Just as the names of such Mudrās have been enumerated which please the various Devas and Devis, so are being described the various Mudrās which please the Ṛṣis. Jñānamudrā, Bhaktimudrā, Tapomudrā, Karmamudrā, and Dānamudrā are such which please the sages (Ṛṣis). Vara Mudrā and Abhaya Mudrā are those with which the Ṛṣis, Deities, Pittṛs and the inhabitants of the three worlds are pleased.

सरस्वती ओरियन्टालिया
के.३७/१०९ गोपाल मन्दिर लेन
वाराणसी

अथ तर्पणवर्णनम्

५४. तर्पणाद्देवताप्रीतिस्त्वरितं जायते यतः ।
अतस्तत्तर्पणं प्रोक्तं तर्पणत्वे न योगिभिः ॥ १ ॥
सकामनिष्कामतया द्विभेदं तर्पणं मतम् ।
सकामतर्पणद्रव्यं भिन्नं निर्दिश्यते बुधैः ॥ २ ॥
तर्पणं मन्त्रयोगस्य मुख्यमङ्गं निरूपितम् ।
इष्टान सन्तर्प्य प्रथमं देवर्षिपितरस्तथा ॥
सन्तर्प्याश्चैव गदितस्तर्पणस्य विधिः शुभः ॥ ३ ॥
माहात्म्यञ्चास्य भवति विधिना तर्पितेन यत् ।
न पितृदेवभूतानां यज्ञानुष्ठानमिष्यते ॥ ४ ॥
अनिशं तर्पणं कार्यमात्मश्रेयोऽभिलाषुकैः ।
तूर्णं हि स्वेष्टदेवस्य वाञ्छद्भिश्च प्रसादनाम् ॥ ५ ॥
मधुना तर्पणं कुर्यात् सर्वकामप्रपूरकम् ।
मन्त्रसिद्धिकरं साक्षान् महापातकनाशनम् ॥ ६ ॥
कर्पूरमिश्रितैस्तोयैर्मासमात्रं हि तर्पयेत् ॥
वशीकृत्य नृपान् सर्वान् भोगी स्याज्जीवनाऽवधि ॥ ७ ॥
घृतैः पूर्णायुषः सिद्धयै दुग्धैरारोग्यसिद्धये ।
अगुरुमिश्रितैस्तोयैः सर्वकालं सुखी भवेत् ॥ ८ ॥
नारिकेलोदकैर्मिश्रैस्तोयैः सर्वार्थसिद्धये ।
मरीचमिश्रितैस्तोयैस्तथा शत्रून् विनाशयेत् ॥ ९ ॥
केवलैरुष्णतोयैश्च शत्रुमुच्चाटयेत् क्षणात् ।
ज्वराक्रान्तो भवेच्छत्रुर्दुग्धसेजात् समंततः ॥ ०१ ॥
शताभिजप्रमात्रेण रोचनातिलकं नरः ।
कृत्वा पश्यति यं मन्त्री तं कुर्याद्दासवत् सुधीः ॥ ११ ॥

DESCRIPTION OF TARPAṆA

54. As the Deities are soon pleased by Tarpaṇa (Satiating, refreshing especially the Goda and deceased persons, by presenting to them libations of water), therefore it (Tarpaṇa)[1] has been so named. In accordance with the objects of desire and desirelessness, the Tarpaṇa is of two kinds. In case of Tarpaṇa for the fulfilment of desired objects, the materials used for Tarpaṇa have been variously specified. Tarpaṇa is an important part of Mantra Yoga. After the Iṣṭa Tarpaṇa (Tarpaṇa of the worshipped Deity) it has been specified to perform Ṛṣi-tarpaṇa, Tarpaṇa of other Deities, and Pitṛ-tarpaṇa. The speciality of Tarpaṇa is that when properly performed there remains no necessity of performing Deva-yajña, Bhūta-yajña, and Pitṛ-yajña. If one wants to please his worshipped Deity soon, then he should perform Tarpaṇa properly every day. By performing Tarpaṇa with honey all the desires are fulfilled, the Mantras become efficacious, and all the great sins are destroyed. By performing Tarpaṇa for one month with Camphor mixed with water one, after captivating all the kings, lives all his life in comfort. By performing Tarpaṇa with Ghee (clarified butter) one gets a complete life-span. In order to remain in a disease-free state it is proper to perform Tarpaṇa with milk. One who regularly performs Tarpaṇa with Agaru (Amyris Agallocha) mixed water, always gets perfect comfort. All the desired objectives are achieved by Tarpaṇa with water mixed with coconut-

---

1. Tarpaṇa is derived from the root "Tṛp" meaning to Satiate.

water. One who performs Tarpaṇa with water mixed with Marica (Strychnos Potatorum) destroys all his enemies. By performing Tarpaṇa only with warm water the enemy is either ruined or is seized by fever. If one wants to remove the troubles of his enemy then he should subside those troubles by Tarpaṇa with milk. If a Sādhaka, after performing Tarpaṇa and a hundred Japa of the Mantra and putting a Tilaka of Rocana (a yellow pigment) on his forehead, sees anyone then that person becomes a slave of the Sādhaka.

अथ हवनतर्पणम्

५५. नोसिध्यत्यजपान्मन्त्रो नाहुतश्च फलप्रदः ।
नानिष्टो ददते कामान् तस्मात्रितयमर्जयेत् ॥ १ ॥

पूजया लभते पूजां जपात् सिद्धिर्न संशयः ।
विभूतिश्चाग्निकार्येण सर्वसिद्धिश्च विन्दति ॥ १२ ॥
नित्यहोमं प्रवक्ष्यामि सर्वार्थं येन विन्दति ।
सपर्यां सम्यगापाद्य बलिपूर्वं चरेद्विधिम् ॥ ३ ॥
ततो होमं तर्पणञ्च चरेत् साधकसत्तमः ।
बलिदैश्चादिकञ्चैव ब्राह्मणः समुषाचरेत् ॥ ४ ॥
अर्घ्योदकेन संप्रोक्ष्य तिस्रो रेखाः समालिखेत् ।
विधिवदग्निमानीय क्रव्यादेभ्यो नमस्तथा ॥ ५ ॥
मूलमंत्रं समुच्चार्य्य कुण्डे वास्थण्डिलेऽपि वा ।
भूमौ वा संस्तरेद्बर्हि व्याहृतित्रितयेन च ॥ ६ ॥
स्वाहान्तेन त्रिधा हुत्वाषडङ्गहवनं चरेत् ।
ततो देवीं समाबाह्य मूलेन षोडशाहुतीः ।
हुत्वा स्तुत्वा नमस्कृत्य विसृजेदिन्दुमण्डले ॥ ७ ॥

न विना पञ्चयज्ञेन सिद्धिमाप्नोति साधकः ।
त्रिविधाः सिद्धयः पञ्चमहायज्ञेन शाश्वतम् ॥ ८ ॥
पञ्चाङ्गसेवने नैव ब्रह्मयज्ञफलागमः ।
स्वेष्टदेव प्रसादः स्यान्नित्यं होमानुशीलनात् ॥ ९ ॥
देवा देव्यश्च तृप्यन्ति होमेनानेन निश्चितम् ।
योगाङ्गयुक्तास्ते यज्ञा यतः शुद्धिविधायकाः ॥ १० ॥
अनुष्ठेयः स यत्नेन मोक्षप्राप्त्यभिलाषुकैः ।
साम्प्रदायिकमाङ्गल्यो नित्यहोमो विधीयते ॥ ११ ॥
इष्टदेवप्रीणनाय हुत्वा पूर्वं यथाविधि ।
ततश्चान्यान्प्रीणयितुं हवनं परिकीर्तितम् ॥ १२ ॥

DESCRIPTION OF HAVANA

55. A Mantra never succeeds without Japa; no fruit can be obtained without Havana (the act of offering oblations with fire) and no desired aim is achieved without worshipping one's Iṣṭa-devatā (worshipped Deity); therefore, all these three must be performed. From worship is obtained worship, from Japa is obtained Siddhis, and from Havana is obtained prosperity and the Siddhis. Now the procedure for daily Homa is being described with which all the desires are fulfilled. First of all, one should perform proper worship and the rite of Balidāna (offerings) succeeded by Homa and Tarpaṇa. Brāhman Sādhakas should also perform the rite of Bali-Vaiśvadeva. After purifying the ground with Arghyodaka one should draw three lines, and then bringing Agni (Fire) he should pronounce the Mantra "Kravyyādebhyo Namaḥ" and the Mūla-

mantra[1] and consecrate the Agni in a Kuṇḍa (firepit) or on a small platform or on a bare ground with the accompaniment of the three Vyāhṛtis. Then, first of all three Havanas should be performed with "Svāhānta" Mantra (Mantra ending in Svāhā) after which should follow Ṣaḍaṅga Havana. Thereafter, invoking the Devī[2] should give sixteen Āhutīs with the accompaniment of the Mūla-mantra. Performing Havana in this manner one should submit his prayer and then discard it in the Īndu-maṇḍala. No Sādhaka can achieve Siddhi without performing Pañca-Mahāyajña (five great sacrifices). This Pañca-mahāyajña bestows threefold Siddhis. The Brahma-yajña succeeds with Pañcāṅga-sevana; the Iṣṭadeva and all the Gods and Goddesses are pleased with regular Homa. Being purificatory at three instances the Pañca-mahā-yajña has been included as a part of Yoga. Worshippers desirous of emancipation should regularly perform Homa. Havana is beneficial for every Yogī whether he belongs to the sects of Vaiṣṇava, Śākta, Śaiva, Gāṇapatya or Saurya. First of all submitting Āhuti (oblation) for the pleasure of Iṣṭa-deva it is proper to submit Āhutīs to other Deities considering them all as parts of his Īṣṭa-deva.

---

1. The primary Mantra of a Devatā is known as the Mūla Mantra (Root-mantra).

2. Here use of the word Devī is indicative of Śakti worship. From this it is proper to understand that the Sādhakas of Vaiṣṇava, Saurya, Gāṇapatya etc., sects should in accordance with their respective customs, invoke their Iṣṭa-devatās in this very order and sequence, because the Mantra-yoga incorporates worship of the five Deities. Such an indication should be understood throughout this work.

अथ बलिवर्णनम्

५६. बलिदानाद्विघ्नशान्तिः स्वेष्टदेवस्य पूजने ।
बलिदानेषु सर्वेभ्यः श्रेष्ठ आत्मबलिः स्मृतः ॥ १ ॥
एतेन नष्टाऽहङ्कारः कृतार्थो मानवो भवेत् ।
कामक्रोधादिशत्रूणां बलिरत्र द्वितीयकः ॥ २ ॥
अन्तर्यागेन संबद्धाः सर्वे चैते प्रकीर्तिताः ।
देवान् सम्पूज्य यत्नेन तदद्रव्यैर्हि बलिक्रिया ।
इष्टदेवाः प्रसीदन्ति विधिनाऽनेन निश्चितम् ॥ ३ ॥
सम्प्रदाये क्वचिदेव प्रीणनाय विलोक्यते ।
फलोपहारस्य विधिर्वर्णितो मुनिपुङ्गवैः ॥ ४ ॥
क्वचिद्यज्ञपशोरेव बलिदानविधिः स्मृतः ।
बलिभेदा हि निर्दिष्टास्त्रिगुणस्यानुसारतः ॥ ५ ॥
इष्टदेव प्रसादाय बलिं दत्वा यथाविधि ।
भूतानां तृप्तये पश्चाद्बलिदानविधिः स्मृतः ॥ ६ ॥
पूजाशिष्टैः फलैः पुष्पैस्तथा द्रव्यैः सुगन्धिभिः ।
बलिं निजेष्टदेवायावश्यं भक्तः समर्पयेत् ॥ ७ ॥
बलिप्रदानतः स्वेष्टदेवो नूनं प्रसीदति ।
विघ्नाः सर्वे प्रणश्यन्ति बलिदानप्रभावतः ॥ ८ ॥
प्रथमं वेष्टदेवाय बलिं दद्याद्यथाविधि ।
भक्त्या ततोन्यदेवेभ्यः पितॄणां तृप्तये ततः ॥ ९ ॥
ब्रह्मणे गृहमध्ये तु विश्वेदेवेभ्य एव च ॥
धन्वन्तरिं समुद्दिश्य प्रागुदीच्यां बलिं क्षिपेत् ॥ १० ॥
प्राच्यां शक्राय याम्यायां यमाय बलिमाहरेत् ।
प्रतीच्यां वरुणायैवसोमयोत्तरतो बलिम् ॥ ११ ॥

दद्याद्धात्रे विधात्रे च बलिं द्वारे ग्रहस्य च ।
अर्यम्णे च बलिं दद्यात् ग्रहेभ्यश्चसमन्ततः ॥ १२ ॥
नक्तञ्चरेभ्यो भूतेभ्यो बलिमाकाशतो हरेत् ।
पितॄणां निर्वपेच्चैव दक्षिणाभिमुखः स्थितः ॥ १३ ॥
गृहस्थस्तत्परो भूत्वा सुसमाहितमानसः ।
ततस्तोयमुपादाय तिष्ठेदाचमनाय वै ॥ १४ ॥
स्थानेषु निक्षिपेत् प्राज्ञस्तास्ता उद्दिश्य देवताः ।
एवं ग्रहबलिं कृत्वा गृहे गृहपतिः शुचिः ॥ १५ ॥
आप्यायनाय भूतानां कुर्य्यादुत्सर्गमादरात् ।
श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि ।
वैश्वदेवं हि नामैतत्सायं प्रातरुदाहृतम् ॥ १६ ॥

DESCRIPTION OF BALI

56. No success can be obtained in the worship of a desired Deity without pacifying the disturbing elements. Bali (presentation of an offering to a Deity) is therefore offered for the pacification of the disturbing elements. Of all the Balis the Ātmabali (offering one's own self) is the best. Ātmabali destroys the Ahaṁkāra and the Sādhaka becomes successful in his aims. In the process of Bali the offering of enemies like Kāma (desire) and Krodha (anger) occupy second place. All these are subjects connected with internal Bali. After the worship when remaining things are offered as Bali then the Iṣṭa-devatā is pleased. In certain sects good fruits are offered as Bali. In some others the practice of Bali of the Sacrificial Animals is also current. All these differences of Bali have been determined on

the basis of the three qualities. After offering Bali for the pleasure of Iṣṭa-devatā it is proper to offe further Balis for the satiation of all the Bhūtas of the world. After performing worship a devotee should always offer Bali of the remaining fruits, flowers and fragrances to his Iṣṭa-devatā. There is no doubt that the Iṣṭa-deva is pleased by Bali, and all the disturbances are also removed through it. First of all one should offer Bali to his Iṣṭa-deva, and then to other Deities. Thereafter a devoted Sādhaka should offer Bali for the satiation of his Pitṛs. For Brahmā and Viśvedevas it is quite proper to offer Bali in one's own house. For Dhanavantari the Bali should be performed in the Northern direction. Balis should be offerred for Indra in the East, for Yama in the South, for Varuṇa in the West, for the Moon in the North. For Dhātā and Vidhātā it is customary to offer Bali at the door of the house. For the Rākṣasas the Bali should be offerred in the direction of the Sky, and for the satiation of Pitṛs one should offer Bali with his face towards South. A householder should first compose and concentrate his mind and then perform Ācaman (sipping water from the palm of the hand for purification; the water so sipped should not be spit out again); then taking water should offer Bali to the above-mentioned Deities at their specified places. Getting purified in this manner a householder should perform Graha-bali (offering to the planets). Again, be should place food-grains on the ground for the satiation of dogs, Śvapacas (low caste people) and birds. This Vaiśvadeva offerring should be performed both in the mornings and evenings.

अथयोगवर्णनम्

५७. अन्तर्यागो बहिर्यागश्चेति यागो द्विधा मतः ।
अत्रोपचारास्त्रिविधा दश षोडश पञ्च च ॥ १ ॥
अत्राध्यात्मं गृहीत्वैव लक्ष्यं स्याच्छ्रेयसा युतः ।
अन्तर्यागस्य महिमा सर्वश्रेष्ठः प्रकीर्त्तितः ॥ २ ॥
नाऽऽपेक्षिता देशशुद्धिर्नापि कालशरीरयोः ।
यागे जपे मानसे वै तथा कर्मणि निश्चितम् ॥
सर्वदा शक्त्ये कर्तुं मानसी निखिला क्रिया ॥ ३ ॥
दिव्यदेशेषु कस्यापि देशस्याश्रयतो भवेत् ।
यागस्य साधनं स्थूलात् सूक्ष्मे कोटिगुणं फलम् ॥ ४ ॥
योगसिद्ध्या जपः सिद्धो ध्यानसिद्धिस्ततः परम् ।
ततः समाधिसिद्धिः स्यादेतया देवदर्शनम् ।
आविर्भवन्तीष्टदेवा दिव्यदेशेषु नित्यशः ॥ ५ ॥
एषु स्थानेषु कल्पाणि यजन्ति परमां शिवाम् ।
अरूपां रूपिणीं कृत्वा कर्मकाण्डरता नराः ॥ ६ ॥
गवां सर्वाङ्गजं क्षीरं स्रवेत् स्तनमुखाद् यथा ।
तथा सर्वात्मको देवः प्रतिमादिषु राजते ॥ ७ ॥
अभिरुप्याच्च बिम्बस्य पूजायाश्च विशेषतः ॥
साधकस्य च विश्वासाद् देवतासन्निधिर्भवेत् ॥ ८ ॥

DESCRIPTION OF YĀGA

57. In accordance with the differentiation of external and internal Yāga is of two kinds. The Upacāras of Yāga have been differentiated into three, on the basis of their number being either sixteen, ten or five. It is all the more beneficial to incorporate a spiritual

aim in the Upacāras of a Yāga. The glory of Antaryāga (Internal Yāga) is above all. For Mānasa Yāga, Mānasa Japa, and Manasa Karma, there is no necessity of Kāla-śuddhi (purification of time), Deśa-śuddhi (purification of place) and Śarīra-śuddhi (purification of Body), because they can be performed at all times and in all conditions. It is proper to practice Yāga at any one of the sixteen Divyadeśas (Divine places). Subtle place (Sūkṣma-deśa) is a million times more fruitful than a Gross place (Sthūla Deśa). After the Siddhi of Yāga, along with the Siddhi of Japa comes the Siddhi of Dhyāna (concentration), and with the Siddhi of Dhyāna comes Samādhi. With the Siddhi of Yāga one can have a vision of the Deity also—the Deity manifests in the Divya-deśas.

Imagining a Form of the One essentially Formless, the person adept in sacrificial rites should worship the Deity Bhagavatī at the above-mentioned places. Just as milk pervades the entire body of a cow but comes out only through her udders, so being all-pervasive the Deities only develop in the central places, such as in Idols etc. There is contiguity of the Deity in the Idol because of the similarity with His form, speciality of worship, and deep faith of the devotee.

(पूजोपचार वर्णनम्)

५८. उत्तमो मानसो यागो मध्यमं बहिरर्चनम् ।
मूलमन्त्रं समुच्चार्य पश्चाद्देयमुदीरयेत ॥ ९ ॥
सम्प्रदानं तदन्तेषु त्यागार्थकपदं ततः ।
एवं क्रमेण सद्वृत्ते ! उपचारात् प्रकल्पयेत् ॥ १० ॥

उपचारा विनिर्दिष्टाः पूजायामेकविंशतिः ॥
मुनिभिर्योगतत्त्वज्ञैर्दश षोडश पञ्च च ॥ ११ ॥

DESCRIPTION OF UPACĀRAS (Things done or used in Pūjā) OF PŪJĀ (Worship)

58. Mānasa Yāga is best, and External Pūjā is medium. First of all, pronouncing the Mūla-Mantra, one should pronounce the name of the thing which he intends to offer to the Deity. Thereafter, the name of the Deity, to whom the thing is being offerred, should be pronounced, and then again, the words of offering be repeated. In this manner all the Upacāras should be offerred to the Deity. The great sages versed in Yoga-science have laid down four categories of Upacāras on the basis of their number in Pujā being either twentyone, sixteen, ten or five.

(एकविंशत्युपचाराः)

५९. आवाहनं स्वागतञ्च ह्यासनं स्थापनं तथा ।
पाद्यमर्घ्यं तथा स्नानं वसनञ्चोपवीतकम् ॥ १२ ॥
भूषणं गन्धपुष्पे वै धूपदीपौ तथैव च ।
नैवेद्याचमने चैव ताम्बूलं तदनन्तरम् ।
माल्यं नीराजनं चैव नमस्कारविसर्जने ॥ १३ ॥

Twentyone Upacāras

59. Āvāhana (Invocation), Svāgata (Welcome), Āsana (Seat for the Image), Sthāpana (Seating), Pādya (Water for washing the feet), Arghya (Offering of unboiled rice, flowers, sandal paste, dūrvā-grass, etc. to the Deity), Snāna (water for bathing), Vastra Cloth), Upavīta (the sacred thread), Bhūṣāṇa

(Ornaments), Gandha (fragrance, sandal paste), Puṣpa (flowers), Dhūpa (incense stick), Dīpa (light), Naivedya (food), Ācamana (water for sipping), Tāmbūla (betal leaves), Mālya (garlands), Āratī (waving lights before an image), Namaskāra (prayer), and Visarjana (bidding the Deity Invoked to go) are the twentyone Upacāras.

(षोडशोपचाराः)

६०. आवाहनं स्थापनञ्च पाद्यमर्घ्यं तथैव च ।
स्नानं वस्त्रं भूषणं वै गन्धपुष्पे च धूपकाः ॥ १४ ॥
दीपस्तथा च नैवेद्यं तथैवाचमनं भवेत् ।
नीराजनञ्च ताम्बूलं प्रणाम इति षोडश ॥ १५ ॥

(Sixteen Upacāras)

60. Āvāhana, Sthāpana, Pādya, Arghya, Snāna, Vastra, Bhūṣaṇa, Gandha, Puṣpa, Dhūpa, Dīpa, Naivedya, Ācamana, Tāmbūla, Āratī and Praṇāma (obeisance) are the sixteen Upacāras.

(दशोपचाराः)

६१. पाद्यमर्घ्यं तथा स्नानं मधुपर्काचमौ तथा ।
नैवेद्यान्ता गन्धमुखा उपचारा दश क्रमात् ॥ १६ ॥

Ten Upacāras

61. Pādya, Arghya, Snāna. Madhuparka (honey, ghee, milk, and curd offerred in a silver or brass vessel), Ācaman, Gandha, Puṣpa, Dhūpa, Dīpa, and Naivedya are the ten Upacāras.

(पञ्चोपचाराः)

६२. गन्धपुष्पे तथा धूपो दीपो नैवेद्यमेव च ।
अखण्डं फलमासाद्य कैवल्यं लभते ध्रुवम् ॥ १७ ॥

Five Upacāras.

62. Gandha, Puṣpa Dhūpa, Dīpa, and Naivedya are the five Upacāras. A Sādhaka gets unlimited bounties with these Upacāras and at the end he gets the state of Kaivalya.

(उपयागवर्णनम्)

६३. विद्वानविद्वरैस्तन्त्रशास्त्रतात्पर्य वेदिभिः ।
ब्रह्मयागो जीवयाग उभौ मार्गौ निरूपितौ ॥ १८ ॥
श्रुतिस्मृतिपुराणानां तन्त्राणाच्चैव पाठतः ।
उत्पद्यते ब्रह्मयागो यद्द्वारा साधकोत्तमः
निजेष्टदेवताज्ञाने समर्थो जायते ध्रुवम् ॥ १९ ॥
वैष्णवा गाणपत्या वा शाक्ताः शैवास्तथैव वा ।
सौरा वा साधकाः सर्वे स्वस्वकल्याणकाङ्क्षिणः ॥ २० ॥
पठेयुर्नियतं गीतां श्रीकृष्णमुखनिर्गताम् ।
गीतां भागवतीञ्चैवादित्यगीतां तथा पुनः ॥ २१ ॥
शिवगीतां तथा गीतां गाणेशीं वा यथाक्रमम् ।
एता हि परमोत्कृष्टास्तेषां स्वाध्यायपोषिकाः ॥ २२ ॥
अनुसृत्याऽधिकारं स्वं गीतापाठे रतो नरः ।
धर्मार्थकाममोक्षाख्यं चतुर्वर्गं समश्नुते ॥ २३ ॥
सर्वेषां प्राणिनामत्र दयया रक्षयापिच ।
मुखन्तु ब्रह्मणो मत्वा ब्राह्मणान्वेद पारगान् ॥ २४ ॥
अतिथींश्चेष्टदेवेन समान् बुद्ध्वा यदर्प्यते ।
भोजनं वसनं पानं जीवयागः स उच्यते ॥ २५ ॥
आभ्यांद्वाभ्यां साधनाभ्यामस्मिन् लोके परत्र च ।
लभन्ते मानवाः शर्म सत्यमेतन्न संशयः ।
उभौ नित्यमनुष्ठेयाववश्यं साधकोत्तमैः ॥ २६ ॥

DESCRIPTION OF UPAYĀGA

63. The Yogīs adept in the sciences of Tantra and knowing its secrets have made two divisions of Ūpayāga, viz. the Brahma-Yāga and the Jīva-Yāga. The Brahma is accompanied by the studies of Vedas, Smṛtis, Purāṇas and Tantras. Through the practice of Brahmayāga a Sādhaka undoubtedly achieves the ability to know the form of his Iṣṭa-devatā. Desirous of their welfare, all the Sādhakas, whether they are Vaiṣṇava, Gāṇapatya Śākta, Śaiva or Saurya, should in accordance with their respective worships study Bhagvadgītā, Bhagavatīgītā, Ādityagītā, Śivagītā, and Gaṇeśgītā. All these Gitās are very good. Their recitation should be perfected by their study. The Sādhaka, who according to his qualifications, studies Gītā, achieves the fulfilment of the four aims of sentient being known as Dharma, Artha, Kāma, and Mokṣa. When for the mercy of all the beings, and for their own protection all the food, clothes, water, etc. are offerred to the Brāhmaṇas adept in Vedic science considered as the mouth of Brahmā, and to the guests cosidered as one's own Iṣṭa-devatā, then that is Jīvayāga. Through the practice of these Brahmayāgas and Jīvayāgas, the Sādhaka undoubtedly obtains unlimited benefaction both in this and the other world. Therefore, every Sādhaka should invariably practice both these Yāgas.

अथ जपवर्णनम्

६४. मननात्त्रायते यस्मात्तस्मात् मन्त्रः प्रकीर्त्तितः ।
जपात् सिद्धिर्जपात् सिद्धिर्जपात् सिद्धिर्न संशयः ॥ १ ॥

मनः संहृत्य विषयान्मन्त्रार्थगतमानसः ॥
न द्रुतं न विलम्बेन जपेनमौक्तिकहारवत् ॥ २ ॥

जपः स्यादक्षरावृत्तिर्धीनसोपांशुवाचिकैः ।
स्वकर्णगोचरो यस्तु स जपो मानसः स्मृतः ।
उपांशुर्निजकर्णस्य गोचरः परिकीर्त्तितः ॥ ३ ॥

मन्त्रानुच्चारयेद्वाचा स जपो वाचिकः स्मृतः ।
उच्चैर्जपाद्विशिष्टः स्यादुपांशुर्दशभिर्गुणैः ।
जिह्वाजपः शतगुणं सहस्रो मानसः स्मृतः ॥ ४ ॥

अतिह्रस्वो व्याधिहेतुरतिदीर्घो वसुक्षयः ।
अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत् ॥ ५ ॥

मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र मारुतः ।
न सिध्यति वरारोहे कल्पकोटिशतैरपि ॥ ६ ॥

जातसूतकमादौ स्यादन्ते च सूतसूतकम् ॥ ७ ॥

सूतकद्वयसंयुक्तो यो मन्त्रः स न सिध्यति ॥
गुरोस्तत्र हितं कृत्वा मन्त्रं यावज्जपेद्धिया ॥ ८ ॥

सूतकद्वयनिर्मुक्तः स मन्त्रः सर्वसिद्धिदः ।
तस्मादेवि प्रयत्नेन ध्रुवेण पूटितं मनुम् ॥ ९ ॥

अष्टोत्तरशतं वाऽपि सप्तवारं जपादितः ।
जपान्ते च ततो जप्याच्चतुर्वर्गफलाप्तये ॥ १० ॥

ब्रह्मबीजं मनोर्दत्त्वा चाद्यन्ते परमेश्वरि ।
सप्तवारं जपेन्मन्त्रं सूतकद्वयमुक्तये ॥ ११ ॥

मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रा न वेत्ति यः ।
शतकोटिजपेनापि तस्य सिद्धिर्न जायते ॥ १२ ॥

लुप्तबीजाश्च ये मन्त्रा न दास्यन्ति फलं प्रिये ।
मन्त्राश्चैतन्यसहिताः सर्वसिद्धिकराः स्मृताः ॥ १३ ॥
चैतन्यरहिता मन्त्राः प्रोक्तवर्णास्तु केवलाः ।
फलं नैव प्रयच्छन्ति लक्षकोटिशतैरपि ।
मन्त्रोच्चारे कृते यादृक् स्वरूपं प्रथमं भवेत् ॥ १४ ॥
शते सहस्रे लक्षे वा कोटिजापेन तत्फलम् ।
हृदये ग्रन्थिभेदश्च सर्वावयववर्द्धनम् ॥ १५ ॥
आनन्दाऽऽश्रूणि पुलको देवावेशः कुलेश्वरि ।
गद्गदोक्तिश्च सहसा जायते नात्र संशयः ॥ १६ ॥

DESCRIPTION OF JAPA

64. That which, from Manana (thinking, reflection) gives Trāṇa (liberation from bondage of the phenomenal world) is called MANTRA. That is, with the Japa (repeated utterance or recitation of a Mantra according to certain rules) of which a Sādhaka is protected or liberated is called Mantra. With persistent Japa a Sādhaka undoubtedly obtains Siddhis. Withdrawing his mind from worldy objects, one perfectly following the meaning of the Mantra, should perform its Japa, neither with a fast nor with a slow but with a medium speed. Repeated utterances or recitation of a Mantra is called Japa. Japa is of three kinds, viz. Mānasa, Upāṁśu and Vācika. Mānas-japa is that which is inaudible even to the person performing Japa. Upāṁśu-japa is that which is audible only to the person performing the Japa. And, Vācika-japa is that in which the Mantra is audibly recited. The Upāṁśu-japa is ten times and Mānasa-japa a thousand times more fruitful

than Vācika-japa. Japa with a very slow speed produces diseases; and Japa with a very fast speed produces destruction of wealth. Therefore, Japa should be performed in a connected form like the pearls in a garland. A person who is unable to excercise Saṁyama (control) over Mana, Śiva, Śakti, and Vāyu, cannot obtain Siddhi even if he does Japa for a whole Kalpa (a fabulous period of time). Before the Mantra there is Jāta-sūtaka (birth difilement) and at the end Sūta-sūtaka (death defilement). A Mantra with two Sūtakas (defilements) can never provide a Siddhi. Therefore, with special service of Guru the Sādhaka should perform Japa thoughtfully. Only the Mantra which is free of the two Sūtakas can become fruitful. Therefore, combining the Mantra with Dhruva one should perform its Japa for a hundred and eight times or seven times. Then, again, repeating the same at the end one should do Japa for the attainment of the fruit of Caturvarga (four aims of sentient beings). In order to get rid of the two defilements one should perform seven times the Japa of a Mantra preceded and followed by Brahma-bīja. One who is ignorant of the meaning of the Mantra, of the methods of giving life or vitality to the Mantra (Mantra-caitanya), and of the Yoni-Mudrā, cannot attain Siddhi, even by its Japa for a hundred millions of times. The Mantras which do not contain Bījas (seeds) can never be fruitful. A Mantra which has been infused with life or vitality, becomes decidedly fruitful. Without giving life to Mantra, its Japa only in the form of combination of a few alphabets never gives any Siddhi even though the Japa is performed

millions of times or indefinitely. When Japa of a Mantra is performed a hundred thousand times strictly in accordance with that form which is its natural and real characteristics emerging from its pronunciation, then the fruit of that Japa is equal to ten million Japas. This opens the knot of the heart, all the organs become strengthened, tears of joy and a feeling of thrill of hairs come to the Sādhaka; he receives the orders of the Deity and his voice becomes overwhelmed with joy—there is no doubt about all these.

(साधनस्थानवर्णनम्)

६५. विष्णोः सूर्यस्य शक्तेश्च विघ्नेशस्य शिवस्य च ।
उपासनापरैः कार्यं स्थित्वा वै देवमन्दिरे ॥
पूते च विजने गेहे साधनं शुभलक्षणम् ॥ १७ ॥
गोमयैर्गाङ्गपानीयैः शोध्यं सम्घनसञ्च तत् ।
शोभितं चैव कर्तव्यं चित्रैर्भावभरैः शुभैः ॥ १८ ॥
प्राप्येत येन चित्तस्य पूतना साधकैः स्फुटम् ।
रजस्तमोभ्यां युक्तं यन्नकुर्यात्तत्र कर्म तत् ॥ १९ ॥
मोक्षं कामयमानेन साधनीयः प्रयत्नतः ।
गङ्गातीरे पश्चवट्यामरण्ये च श्मशानके ॥ २० ॥
तीर्थे च सम्प्रदायस्य चात्मनो ह्यनुसारतः ।
भूगर्ते च तथा योगगुहायामनुपद्रुतैः ॥
साधनीयः प्रयत्नेन प्रेष्ठसिध्यभिलाषुकैः ॥ २१ ॥
योगसञ्च विधातव्यं प्रत्यूहो यत्र नो भवेत् ।
असंस्पृष्टं च विषयैर्विश्वोद्भूतैर्निरापदम् ॥ २२ ॥

DESCRIPTION OF THE PLACE OF SĀDHANĀ

65. It is proper for the worshippers of Viṣṇu, Sūrya, Śakti, Gaṇeśa and Śiva to perform their Sādhanā either in a temple or in some quiet abode suitable for Sādhanā. A place of Sādhanā should always be purified by cowdung and Ganges water and tastefully decorated with pictures communicating pious disposition. No Rājasika or Tāmasika works be performed in a Sādhanā-place, nor irreligious people be allowed entrance in it. A Sādhaka desirous of emancipation should, according to his respective sect, perform Sādhanā at the bank of Ganges, under Pañcavaṭī, in a forest, a Śmaśāna (cremation ground), or sacred place (Tirtha). If one desires to accomplish some special Siddhi then he should make an underground cave and fully undisturbed practice his Sādhanā there. The place for the practice of Yoga should be such where there is no possibility of disturbances, and it should be completely cut off from the external world.

(साधनाधिकारवर्णनम्)

६६. उपासको भवेद्यस्य सम्प्रदायस्य कस्यचित् ।
विना गुरुपदेशेन नैष्फल्यं साधने भवेत् ॥ २३ ॥
पुराणतन्त्रशास्त्रेषु संहितोपनिषत्सु च ।
वर्णितं विविधं रूपं पञ्चोपासनभेदतः ॥ २४ ॥
यथाधिकारं मत्त्राणां देवतायाश्च निर्णयः ।
न ग्रन्थैः साध्यते किन्तु गुरोरेवोपलभ्यते ॥ २५ ॥
नैशं तमोऽपनेतुं सूर्यः शक्तो न दीपचन्द्राद्याः ।
तद्वद् यथाधिकारं शक्तागुरवो विनयानय ॥ २६ ॥

विना गुरूपदेशेन मन्त्रयोगस्य साधने ।
नैष्फल्यं समवाप्नोति साधकः साधनोन्मुखः ॥ २७ ॥

DESCRIPTION OF COMPETENCY FOR SĀDHANĀ

66. A Sādhaka, whether he is a worshipper of either Viṣṇu, Sūrya, Śakti, Gaṇeśa or Śiva, will always meet failure if he performs his Sādhanā without instructions of a Guru. Although various Mantras are described in the Upaniṣads, Saṁhitās, Purāṇas, Tantras and Mantraśastras; and various forms of worship of the Five Deities are also available in the Śāstras, yet the determination of Mantra and Devatā in accordance with one's qualification can never be done with the help of a book. Just as a lantern cannot remove the darkness of night altogether—the darkness of night vanishes only by sunlight—so the Sādhaka also can obtain his respective competency for Sādhanā only through the mouth of a Guru. Without instruction of a Guru the Sādhanā of a Mantra Yogī becomes fruitless and even harmful.

(मन्त्रसिद्धेरुपायः)

६७. मन्त्रे सम्यक् प्रजपिते यदि सिद्धिर्न जायते ।
पुनस्तथैव कर्तव्यं ततः सिद्धिर्भवेद्ध्रुवम् ॥ २८ ॥
भूयोऽप्यनुष्ठितो मन्त्रो यदि सिद्धो न जायते ।
पुनस्तथैव कर्तव्यं ततः सिद्धो न संशयः ॥ २९ ॥
पुनः सोऽनुष्ठितो मन्त्रो यदि सिद्धो न जायते ।
उपायास्तत्र कर्त्तव्याः सप्तशङ्करभाषिताः ॥ ३० ॥

भ्रामणं रोधनं वश्यं पीडनं शोषपोषणे ।
दहनान्तं क्रमात् कुर्यात् ततः सिद्धो भवेन्मनुः ॥ ३१ ॥

WAYS FOR THE ATTAINMENT OF MANTRA-SIDDHI

67. When even after performing Puraścaraṇa (repetition, after certain preparations and under certain conditions, of a Mantra a large number of times) in specially careful manner the Mantra does not become Siddha (potent or efficacious), then one should repeat the proceedings a second time. Even then if the Mantra does not become Siddha one should repeat a third time. If even after the third effort the Mantra does not become Siddha, one should respectively take resort to seven procedures, viz. Bhrāmaṇa, Rodhana, Vaśīkaraṇa, Pīdana, Śodhana, Poṣaṇa, and Dāhana, described by Lord Śiva. Detailed description of these seven procedures are available in various works of Tantra. Therefore, when necessary, a Sādhaka should learn these from a guru versed in Tantraśāstra.

(पञ्चाङ्गशुद्धिः)

६८. आत्मस्थान-मन्त्र-द्रव्य-देवशुद्धीर्यथाक्रमात् ।
यावन्न कुरुते देवि तस्य देवार्चनं कुतः ॥ ३२ ॥
पञ्चशुद्धिं विना पूजा अभिचाराय कल्पते ।
स्नानेन भूतशुद्ध्या च प्राणायामादिभिस्तथा ॥ ३३ ॥
षडङ्गाद्यखिलन्यासैरात्मशुद्धिरुदीरिता ।
सम्मार्जनानुलेपाद्यैर्दर्पणोदरवत्शुभम् ॥ ३४ ॥
वितानधूपदीपादिपुष्पमाल्यादिशोभितम् ।
पञ्चवर्णरजोभिश्च स्थानशुद्धिरितीरितम् ॥ ३५ ॥

ग्रथित्वा मातृकावर्णैर्मूलमन्त्राक्षराणि च ।
